अथ भृगुसूत्रप्रारंभः

श्रीगणेशायनमः॥ ॥लग्नेरवौ॥ आरोग्यंभवति॥ पित्तप्रकृतिः नेत्ररोगी मेधावी सदाचा-
रोवा उष्णोदरवान् मूर्खः पुत्रहीनः तीक्ष्णबुद्धिः अल्पभाषी प्रवासशीलः सुखी स्वोच्चेकीर्ति
मान् बलिनिरीक्षणः विद्वान् नीचेप्रतापवान् ज्ञानद्वेषी दरिद्रः अंधकः शुभदृष्टेनदोषः सिंहेस्वां-
शेनाथः कुलिरेज्ञानवान् रोगी बुद्बुदाक्षः मकरेहृद्रोगी मीनेस्त्रीजनसेवी कन्यायांरवौ कन्या-
प्रजः दारहीनः कृतघ्नश्च क्षेत्रीशुभयुक्तः आरोग्यवान् पापयुतेशत्रुनीचक्षेत्रेतृतीयेवर्षेज्वरपी
डा शुभदृष्टेनदोषः॥ ॥अथद्वितीयेरविफलं॥ ॥मुखरोगी पंचविंशद्वर्षेराजदंडेनद्रव्यच्छेदः
उच्चस्वक्षेत्रेनदोषः पापयुतेनेत्ररोगी स्वल्पविद्वान् रोगी शुभवीक्षितेधनवान् दोषादीन्व्यपहर
ति नेत्रसौख्यंस्वोच्चेस्वक्षेत्रेवा बहुधनवान् बुधयुतेपवनवाक् धनाधिपःस्वोच्चेवाग्मी शास्त्रज्ञः
ज्ञानवान् नेत्रसौख्यंराजयोगश्च॥ ॥तृतीयेरविफलं॥ ॥बुद्धिमान अनुजरहितः जेष्ठना-
शः पंचमवर्षेचतुरष्टद्वादशवर्षेवा किंचित्पीडा पापयुतेक्रूरकर्ता हि भ्रातृमान् पराक्रमी युद्धे
शूरश्च कीर्तिमान् निजधनभोगी शुभयुतेसोदरवृद्धिः भावाधिपेबलयुतेभ्रातृदीर्घायुः- १

त्रुकलहवान् सहोदरहीनः अग्निमांद्यादिरोगी तटाककूपादिषुजलादिगंडः पापयुतेरोगवान् क्षीण
चंद्रपूर्णफलानिरुभयुतेबलवान्अरोगी ॥ ॥ चंद्रेसप्तमे ॥ ॥ मृदुभाषी पार्श्वनेत्रः द्वात्रिंशा-
त् वर्षेस्त्रीयुक्तः स्त्रीलोलः स्त्रीमूलेनग्रंथशास्त्रादिपीडा राजप्रसादलाभः भावाधिपेबलयु-
तेस्त्रीद्वयंक्षीणचंद्रेकलत्रनाशः पूर्णचंद्रबलयुतेस्वोच्चेएकदारवान् भोगलुब्धः ॥ ॥ चंद्रा
ष्टमे ॥ ॥ अल्पवाहनवान् नष्टादितटाकादिषुगंडः स्त्रीमूलेनबंधुजनपरित्यागीस्वर्क्षेस्वो-
च्चेदीर्घायुः क्षीणेवाबलयुतेदीर्घायुः ॥ ॥ चंद्रेनवमे ॥ ॥ बहुश्रुतवान् पुण्यवान् तटाकगो-
पुरादिनिर्माणपुण्यकर्तापुत्रभाग्यवान् पूर्णचंद्रेबलयुतेबहुभाग्यवान् पितृदीर्घायुः पाप
युतेपापक्षेत्रेभाग्यहीनः नष्टपितृमातृकः ॥ ॥ चंद्रेदशमे ॥ ॥ विद्यावान्पापयुतेसप्तविंशद्वर्षे
विधवासंगमेनजनविरोधी अतिमेधावी सत्कर्मनिरतः कीर्तिमान् दयावान् भावाधिपेबल
युतेविशेषसत्कर्मसिद्धिः पापनिरीक्षितेपापयुतेवादुष्कृतिः कर्मविघ्नः ॥ ॥ चंद्रएकादशे ॥ बहु-
श्रुतवान् पुत्रवान् उपकारीपंचाशद्वर्षेपुत्रऋणबहु प्राबल्ययोगः गुणाढ्यः भावाधिपेब-

लहीनेबहुधनव्ययः बलयुतेलाभवान् लाभेचंद्रेनिक्षेपलाभः शुभयुतेननरवाहनयोगःब
हुविद्यावान् क्षेत्रवान् अनेकजनरक्षणभाग्यवान्॥ ॥द्वादशेचंद्रे॥ ॥दुर्भोजनःदुष्यात्रव्य
यः कोपोपद्रवःव्यसनसमृध्दिमान् स्त्रीरोगयुक्तः पतितः अन्नहीनः शुभयुतेविद्वान् दया
वान् पापशत्रुयुतेपापलोकः शुभमित्रयुतेश्रेष्ठलोकवान् इत्युपदेशसूत्रेचंद्रलग्नादिभा-
वोद्वितीयोऽध्यायः॥२॥ ॥अथभौमेलग्ने॥ ॥देहेव्रणंभवति दृढगात्रचोरबुभूषकः
वृहन्नाभिः रक्तपाणिः क्रूरोबलवान् मूर्खः कोपवान् समानशौर्यः धनवान् चापलवान् वि
त्ररोगी क्रोधी दुर्जनः स्वोच्चेस्वक्षेत्रे आरोग्यंदृढगात्रवान् राजसन्मानकीर्तिः दीर्घायुः पाप-
शत्रुयुतेअल्पायुः स्वल्पपुत्रवान् वातशूलादिरोगः दुर्मुखः स्वोच्चेलग्नर्क्षेधनवान् विद्या-
वान् नेत्रविलासवान् तत्रपापयुतेपापक्षेत्रेपापदृष्टियुतेनेत्ररोगः॥ ॥कुजद्वितीये॥ ॥
विद्याहीनः लाभाधिपोषष्ठादितिष्ठन्चेत्नेत्रवैपरीत्यंभवति शुभदृष्टेपरिहारः स्वोच्चेस्वक्षे
त्रेविद्यावान् नेत्रविलासः तत्रपापयुतक्षेत्रेपापदृष्टेनेत्ररोगः॥ ॥कुजतृतीये॥ ॥स्वस्त्री-

पापयुते पापईक्षणवशात्नाशः शुभवीक्षणवशाद्धनवान् भोगी सुखी॥ ॥चतुर्थरवि-
फलं॥ ॥हीनांगः अहंकारी जनविरोधी उष्णदेही,मनःपीडावान् द्वात्रिंशद्वर्षेसर्वकर्मानुकूल
वान् बहुप्रतिष्ठासिद्धिः सत्तापदवी ज्ञानशौर्यसंपन्नः,हीनः धनधान्यहीनः भावाधिपेबलयुते-
स्वक्षेत्रत्रिकोणेकेंद्रेलक्षणापेक्षया आंदोलिकाप्राप्तिः पापयुतेपापवीक्षणवशाद्दुःस्थानेदु
र्वाहनसिद्धिः क्षेत्रहीनः परगृहएववासः॥ ॥पंचमरविफलं॥ ॥निर्धनः स्थूलदेही सप्तमेव-
र्षेपित्ररिष्टवान् मेधावी अल्पपुत्रः बुद्धिमान् भावाधिपेबलयुतेपुत्रसिद्धिः पापयुतेवीक्षणव-
शात् स्त्रीप्रजासमृद्धिः राहुकेतुयुतेसर्पशापात्सुतक्षयः कुजयुतेशत्रुमूलात्शुभदृष्टियुतेन-
दोषः सूर्यनारभादिषुभक्तः बलयुतेपुत्रसमृद्धिः॥ ॥षष्ठेरविफलं॥ ॥ अल्पज्ञातिः शत्रुवृ-
द्धिः धनधान्यसमृद्धिः विंशतिवर्षेनेत्रवैपरीत्यंभवति शुभदृष्टियुतेनदोषः अहिकानन पार
कन्मंत्रसेवी कीर्तिमान् शोकरोगी महोष्णदेही शुभयुतेभावाधिपेदेहारोग्यं ज्ञातिशत्रुबा
हुल्यं भावाधिपेदुर्बलेशत्रुनाशः पितृदुर्बलः॥ ॥सप्तमेरविफलं॥ ॥ विवाहविलंबनंस्त्री-

द्वेषी परदाररतः दारद्वयवान् पंचविंशद्वर्षे देशांतरप्रवेशः अभक्ष्याभक्षणः विनोदशीलः दा-
रद्वेषी नाशांनबुधिः स्यात् स्वरर्क्षे बलवति एकदारवान् शत्रुनीचवीक्षिते पापयुते वीक्षणैर्बहुदार-
वान्॥ ॥ अष्टमरविफलं॥ १॥ अल्पपुत्रः नेत्ररोगः दशमेवर्षे शिरोव्रणी न्रूभयुतदृष्टे परिहा-
रः अल्पधनवान् गोमहिष्यादिनाशः देहरोगः ख्यातिमान् भावाधिपे बलयुते इष्टक्षेत्रवान् स्वो
च्चस्वक्षेत्रे दीर्घायुः॥ ॥ रविनवमे॥ ॥ सूर्यादिदेवताभक्तिः धार्मिकः अल्पभाग्यः पितृद्वे
षी कृतदारवान् स्वोच्चस्वक्षेत्रे पितृदीर्घायुः बहुधनवान् तपोध्यानशीलः गुरुदेवताभक्तिः नी
चारि पापक्षेत्रे दृष्टे वा पितृनाशः क्रूभयुतवीक्षणावशात् पितृदीर्घायुः॥ ॥ दशमेरविफलं॥
॥ अष्टादशवर्षे विद्याधिकारः प्रसिद्धो भवति द्रव्यार्जनसमर्थः दृष्टचित्तः राजप्रियः सत्क-
र्मरतः राजशूरः ख्यातिमान् स्वोच्चस्वक्षेत्रे बलपरः कीर्तिप्रसिद्धः तटाकक्षेत्रगोपुरादिब्रा
ह्मणप्रतिष्ठासिद्धिः पापक्षेत्रे पापयुते पापदृष्टिवशात् कर्मविघ्नं दुष्कृतिः अनाचारः दुष्कर्मकृ
त्पापी॥ ॥ एकादशरविफलं॥ ॥ बहुधान्यवान् पंचविंशद्वर्षे वाहनसिद्धिः धनवाञ्जालद्रव्या

र्जनसमर्थः प्रभुज्वरिनः भृत्यजनस्नेहः पापयुतेबहुधान्यव्ययः वाहनहीनः स्वक्षेत्रेस्वोच्चेअ
धिकप्राबल्यं वाहनेशयुतेबहुक्षेत्रेविनाधिकारः वाहनयोगबहुभाग्यवान्॥ ॥रविद्वादशा
फलं॥ ॥षट्त्रिंशद्वर्षेगुल्मारोगीअपात्रव्ययकारीपतितः धनहानिः गोहत्यादोषकृत परदे-
शवासी भावाधिपेबलयुतेवादेवतासिद्धिः शय्याखट्वांगादिसौख्यं पापयुते अपात्रव्यय-
कारीसुखशय्याहीनः षष्ठेशयुते कोष्ठरोगयुतः शुभदृष्टियुतेनिवृत्तिः पापीरोगवृद्धि
मान्॥ ॥इतिप्रथमोऽध्यायः॥ ॥लग्नेचंद्रः॥ ॥रूपलावण्ययुक्तश्चपलः व्याधिनाज
लादसौख्यः पंचदशवर्षेबहुयात्रावान् मेषवृषभकर्कलग्नेचंद्रेशास्त्रपरः धनीस्फुरवीनृपालः
मृदुवाक् बुद्धिरहितः मृदुगात्रः बली शुभदृष्टेबलवान् बुद्धिमान् आरोग्यवान् वाचालकः
धनी लग्नेशबलरहितेव्याधिमान् शुभदृष्टेआरोग्यवान्॥ ॥चंद्रद्वितीये॥ ॥शोभनवान्
बहुप्रतापीधनवान् अल्पसंतोषी अष्टादशवर्षेराजद्वारेणसेनाधिपत्ययोगः पापयुतेविद्या-
हीनः शुभयुतेविद्याबहुधनवान् एकएवपूर्णचंद्रेणासंपूर्णधनवान् अनेकविद्यावान्॥ ॥चं-

द्रत्तृतीये॥ ॥भगिनीसामान्यं वातशरीरी अन्नहीनः अल्पभाग्यंचतुर्विंशतिवर्षेभावीरूपे
णराजदंडेनद्रव्यच्छेदः गोमहिष्यादिहीनः पिशुनः मेधावीसहोदरवृध्दिः॥ ॥चंद्रेचतुर्थे॥
॥राज्याभिषेको अश्ववान् क्षीरसमृध्दिः धनधान्यसमृध्दिः मातृरोगी परस्त्रीस्तनपानंकरोति-
मिष्टान्नसंपन्नः परस्त्रीलोलः सौख्यवान् पूर्णचंद्रस्वक्षेत्रेबलवान् मातृदीर्घायुःक्षीणचं-
द्रेपापयुतेमातृनाशः वाहनहीनः बलयुतेवाहनसिध्दिः भावाधिपेस्वोच्चे अनेकाश्वादिवा-
हनसिध्दिः॥ ॥पंचमेचंद्रे॥ ॥स्त्रीदेवतासिध्दिः भार्यारूपवतीकश्चित्कोपवतीस्तनमध्ये
लांछनंभवति चतुष्पादलाभः स्त्रीहृयं बहुक्षीरलाभः सत्ययुतः बहुश्रमोत्पन्नः चिंतावा-
न् स्त्रीप्रजावान् एकपुत्रवान् स्त्रीदेवतोपासनावान् शुभयुतेवीक्षणवशात् अनुग्रहसम-
र्थः पापयुते क्षणवशान्निग्रहसमर्थः पूर्णचंद्रेबलवान् अन्नदानप्रीतिः अनेकबुधप्रसादै-
श्वर्यसंपन्नः सत्कर्मकृत् भाग्यसमृध्दिः राजयोगोज्ञानवान्॥ ॥चंद्रेषष्ठे॥ ॥अधिकदारि-
द्र्यदाहीषट्त्रिंशद्वर्षेविधवासंगमीतत्रपापयुतेहीनपापकरः राहुकेतुयुते अर्थहीनः चोरकः श

व्यभिचारिणी शुभदृष्टेनदोषः अनुजहीनः द्रव्यालाभः राहुकेतुयुतेवेश्यासंगमः भ्रातृद्वेषी-
क्रूरयुतः शुभगः अल्पसहोदरः पापयुतेवीक्षणेनभ्रातृनाशः उच्चस्वक्षेत्रेशुभयुते भ्रातृदी-
र्घायुः धैर्यविक्रमवान् युद्धेशूरः पापयुतेमित्रक्षेत्रेधनिमान् ॥ ॥कुजचतुर्थे॥ ॥गृहाच्छिद्रं
अष्टमेवर्षेपित्रारिष्टं मातृरोगीसौम्ययुतेपरगृहवासः विरोगशरीरीक्षेत्रहीनः धनधान्यही-
नः जीर्णगृहवासः उच्चेस्वक्षेत्रेशुभयुतेमित्रक्षेत्रेवाहनवान् क्षेत्रवान् मातृदीर्घायुः नीचर्क्षे
पापमृत्युयुतेमातृनाशः सौम्ययुतेवाहननिष्ठावान् बंधुजनद्वेषी स्वदेशपरित्यागीवस्त्रही-
नः॥ ॥कुजपंचमे॥ ॥निर्धनः पुत्राभावः दुर्मार्गी राजकोपः षड्वर्षेआयुधेनकिंचिद्ग-
ण्डकालः दुर्व्यसनज्ञानशीलवान् मायावादी तीक्ष्णधीः उच्चस्वक्षेत्रेपुत्रसमृद्धिः अन्नदानप्रियः
राजाधिकारयोगः शत्रुपीडापापयुतेपापक्षेत्रेपुत्रनाशः बुद्धिभ्रंशादिरोगः रंध्रेशेपापयु-
तेपापीवीरः दत्तपुत्रयोगः॥ ॥कुजषष्ठे॥ ॥प्रसिद्धः कार्यसमर्थः शत्रुहंतापुत्रवान् स-
प्तविंशतिवर्षेकन्यकाद्रव्यादिरूढवान् शत्रुक्षयः पापर्क्षेपापयुतेपापदृष्टेपूर्णफलानिवान

त्रकृच्छ्रादिरोगः बुधक्षेत्रे कुष्टरोगः शुभदृष्टे परिहारः॥ ॥कुजसप्तमे॥ ॥स्वदारपीडा पापर्क्षेपा
पयुतेन चरर्क्षे स्वदारहानिः शुभयुते जीवनिपत्यौस्त्रीनाशः विदेशपरः उच्चमित्रस्वक्षेत्रे शुभयुते-
पापक्षेत्रे ईक्षणवशात् कलत्रनाशः अथवा चोरव्यभिचारमूलेन कलत्रांतरं दुष्टस्त्रीसंगः भग-
चुंबनवान् चतुष्पादमैथुनवान् मद्यपानप्रियः मंदयुते दृष्टे शिश्नचुंबनः केतुयुते रजस्वलास्त्रीसं-
भोगी तत्र शत्रुयुते बहुकलत्रनाशः अवीरः अहंकारी वा शुभदृष्टे न दोषः॥ ॥कुजाष्टमे॥ ॥
नेत्ररोगी अर्धायुः पितृरिष्टं मूत्रकृच्छ्ररोगः अल्पपुत्रवान् बालग्रहलादिरोगः दारसुखयुतः
शुभयुते देहारोग्यवान् दीर्घायुः मनुष्यादिवृद्धिः पापक्षेत्रे पापयुते ईक्षणवशात् वातक्षया
दिरोगः मूत्रकृच्छ्राधिक्यं वा मध्यमायुः भावाधिपे बलयुते पूर्णायुः॥ ॥कुजनवमे॥ ॥पितृरि
ष्टं भाग्यहीनः उच्चस्वक्षेत्रे गुरुदारगः॥ ॥कुजदशमे॥ ॥जनवल्लभः भावाधिपे बल
युते भ्रातृदीर्घायुः विशेषभाग्यवान् ध्यानशीलवान् गुरुभक्तियुतः पापयुते कर्मविघ्न
वान् शुभयुते शुभक्षेत्रे कर्मसिद्धिः कीर्तिप्रतिष्ठः अष्टादशवर्षे द्रव्यार्जनसमर्थः सर्वसा

मर्थ्यंहृदगात्रः चोरबुध्दिः पापयुतेपापक्षेत्रे कर्म विघ्नः दुष्कृतिः भाग्येशकर्मेशयुते महाराजयोग
राज्येपट्टाभिषेकवान् गुरुयुतेगजांतऐश्वर्यवान् भूसमृध्धिमान् ॥ ॥कुजएकादशे॥ ॥ब-
हुकृत्यवान् धनीगुणाढ्यु लाभवान् स्वक्षेत्रेशयुतेराजाधिपत्यवान् शुभदृष्टयुते महाराजाधिप
त्ययोगो भ्रातृवित्तवान् कुजद्वादशे द्रव्याभावः वातपित्तदेहः पापयुतेदांभिकः इत्युपदेश-
सूत्रेकुजस्थलग्न भावेतृतीयोऽध्यायः ॥ ३॥ ॥लग्नेबुधे॥ ॥विद्यावान्विवाहादिबहु-
श्रुतवान् अनेक सार्वभौमः मंत्रवादी पिशाचोच्चाट नसमर्थः मृदुभाषी विद्वान् क्षमीदयावान् सप्त-
विंशातिवर्षेतीर्थयात्रायोगः बहुलाभबहुविद्यावान् पापयुतेपापक्षेत्रेदेहरोगः पित्तपांडुरोगः-
शुभयुतेशुभक्षेत्रेदेहारोग्यंस्वर्णकांतिदेहः ज्योतिः शास्त्रपठितः अंगहीनः सज्जनद्वेषी
नेत्ररोगीसप्तदशवर्षेभ्रातृणांअन्योन्यकलहः वंचकः उच्चस्वक्षेत्रे भ्रातृसौख्यंश्रेष्ठलो
कंगमिष्यति पापयुतेपापदृष्टियुतेनीचर्क्षेपापलोकंगमिष्यति शय्यासुखवर्जितः दु
ष्टदेवतोपासकः पापमंदादियुतेवामनेत्रेहानिः षष्ठेशयुतेनीचेशयुतेनदोषः अपात्रव्य

यवान् पापदृष्टशुभयुते निश्चयेन धनधान्यादिधार्मिकबुद्धिः अल्पवित् गणितशास्त्रज्ञः सौ-
ख्यं तर्कशास्त्रवित् दृढगात्रः॥ ॥ बुधद्वितीये॥ ॥ पुत्रसमृद्धिः वाचालकः वेदशास्त्रविच
क्षणः संकल्पसिद्धिः धनी गुणाढ्यः सद्गुणी पंचदशावर्षे बहुविद्यावान् धनवान् बहुलाभप्रदः पाप
युते पापक्षेत्रे अरिनीचगे विद्याहीनः क्रूरत्ववान् पवनव्याधिः शुभयुतेवीक्षणाद्धनी वि
द्यावान् गुरुयुतेवीक्षणात् गणितशास्त्राधिकारे उत्तानबुध्धिः॥ ॥ बुधतृतीये॥ ॥ भ्रा
तृकारकः बहुसौख्यवान् पंचदशावर्षे क्षेत्रपुत्रः धनलाभवान् सद्गुणवान् भावाधिपे बलयुते-
भ्रातृदीर्घायुः धैर्यवान् भावाधिपे दुर्बले भ्रातृपीडाभीतिमान् बलयुते भ्रातृदीर्घायुः॥-
बुधचतुर्थे॥ ॥ हस्तचापल्यवान् धैर्यवान् विशालाक्षः पितृमातृसौख्यं ज्ञानवान् स्फरवी
षोडशावर्षे द्रव्यापहाररूपेण बहुलाभप्रदो भवति गुरुशुक्रशनियुते अनेकवाहनवान् भा-
वाधिपे बलयुते आंदोलिकाप्राप्तिः राहुकेतुशनियुते वाहनारिष्टवान् क्षेत्रसुखवर्जितः बं
धुकुलद्वेषी कपटवान्॥ ॥ बुधपंचमे॥ ॥ मातुलगंडः मात्रादिसौख्यं पुत्रविघ्नमेधावी

मधुरभाषीबुद्धिमान्भावाधिपेपापयुतेबलहीने पुत्रनाशः अपुत्रः दत्तपुत्रप्राप्तिः पापक-
र्मीमंत्रवादी ॥ ॥ बुधषष्ठे ॥ ॥राजपूज्यः विद्याविघ्नः दांभिकः विवादशूरः त्रिंशद्वर्षेबहुरा
जस्नेहो भवति पद्मा दिलिख्यः कुजर्क्षेनीलकुष्ठादिरोगोशानिराहुयुतेकेतुयुतेवातशूलादि
रोगः ज्ञातिशत्रुकलहःभावाधिपेबलयुतेज्ञातिप्रबलः अरिनीचर्क्षेज्ञातिक्षयः ॥ ॥ बुधस-
प्तमे ॥ ॥मातृसौख्यंअश्ववादिरूढोधर्मज्ञः उदारमतिः दिगंतविश्रुतकीर्तिः राजपूज्यः तत्र-
शुभयुतेचतुर्विंशतिवर्षेआंदोलिकाप्राप्तिः कलत्रबुद्धिमतिःअभक्ष्याभक्षणः भावेशोबल-
युतेएकदार वान्दारेशोदुर्बलेपापेपापर्क्षेकुजादियुते कलत्रनाशः स्त्रीजातके पतिनाशः कलत्रं-
कुष्ठरोगि अरूपवत् ॥ ॥ बुधाष्टमे ॥ ॥ आयुः कारकः बहुक्षेत्रवान्सप्तपुत्रवान्पंचविं-
शतिवर्षेअनेकप्रतिष्ठासिद्धिःकीर्तिप्रसिद्धिः भावाधिपेबलयुतेपूर्णायुः अरिनीचपापयु-
ते अल्पायुः अथवाउच्चस्वक्षेत्रेशुभयुतेपूर्णायुः ॥ ॥ बुधनवमे ॥ ॥ बहुप्रजासिद्धिः वे
दशास्त्रविशारदः संगीतपाठकः दाक्षिण्यवान्धार्मिकःप्रतापवान् बहुलाभवान्पितृदीर्घा

युः पापयुतेपापक्षेत्रेपापवीक्षणवशात् पितृनाशः पितृक्लेशकरः गुरुजनद्वेषी भावाधिपेबल-
युतेपितृदीर्घायुः तपोध्यानशीलवान्॥ ॥बुधदशमे॥ ॥सत्कर्मसिध्धिः धैर्यवान् अने-
ककीर्तिमान् बहुवित्तवान् अष्टविंशतिवर्षेनेत्ररोगवान् उच्चस्वक्षेत्रेगुरुयुते अग्निष्टोमादि-
बहुकर्मवान् अरिमूढपापयुतेकर्मविघ्नवान् दुष्कृतिः अनाचारः॥ ॥बुधएकादशे बहुमं-
गलप्रदः अनेकप्रकारेणधनवान् एकोनविंशतिवर्षात् उपरिक्षेत्रपुत्रधनवान् दयावान् पा-
पक्षेत्रेपापयुते हीनमूलेनधनलोपः उच्चस्वक्षेत्रशुभयुतेशुभमूलेनधनवान्॥ ॥बुधद्वादशे
ज्ञानवान् विचरणशाली पापयुतेचंचलचित्तः नृपजनद्वेषी शुभयुतेनधर्ममूलेनधनव्ययः
विद्याहीनः इत्युपदेशसूत्रेबुधस्यलग्नभावश्चतुर्थोऽध्यायः॥४॥ ॥लग्नेगुरुः॥ ॥स्व-
क्षेत्रेशाब्दशास्त्राधिकारी त्रिवेदीबहुपुत्रवान् सुखीचिरायुः ज्ञानवान् उच्चेपूर्णफलानि षो-
डशवर्षेमहाराजयोगः अरिनीचपापक्षेत्रेपापयुतेनीचकर्मवान् मनश्चलवान् मध्यायुः पु-
त्रहीनः स्वजनपरित्यागी कृतघ्नः गर्विष्ठः बहुजनद्वेषीसंचारवान् पापक्लेशभोगी॥ ॥गुरु

द्वितीये॥ ॥धनवान् बुद्धिमान्इष्टभाषीषोडशवर्षे धनधान्यसमृद्धिः बहुप्राबल्यवान् उच्च
स्वक्षेत्रधने द्रव्यवान् पापयुते विद्याविघ्नः चोरवंचन वान् दुर्वचनः अनृतप्रियः नीचक्षेत्रेपा
पयुते मद्यपानी भ्रष्टः कुलनाशकः कलत्रांतरं पुत्रहीनः॥ ॥गुरुस्तृतीये॥ ॥अतिलुब्धः
भ्रातृवृद्धिः दाक्षिण्यवान् संकल्पसिद्धिः बंधुदोषकरः अष्टत्रिंशद्वर्षे यात्रासिद्धिः भा
वाधिपे बलयुते भ्रातृदीर्घायुः भावाधिपे पापयुते भ्रातृनाशः धैर्यहीनः बुद्धिजाड्यः दरिद्रः॥
॥ ॥गुरुश्चतुर्थे॥ ॥स्वरवीक्षेत्रवान् बुद्धिमान् क्षीरसमृद्धिः सन्मनाः मेधावी भावाधिपे बल
युते भृगुचंद्रयुक्ते त्रयस्त्रिंशद्वर्षे णनरवाहनयोगः। बहुक्षेत्रः अश्ववाहनयोगः गृहविस्तारवान् पाप
युतेदृष्टिवशात् पापिनः क्षेत्रवाहनहीनः परगृहवासः क्षेत्रहीनः मातृनाशः बंधुद्वेषी॥ ॥
गुरुपंचमे॥ ॥बुद्धिचातुर्यवान् विशालेक्षणः वाग्मी प्रतापी अन्नदानप्रियः कुलप्रियः अ
ष्टादशवर्षे राजद्वारेण सेनाधिपत्ययोगः पुत्रसमृद्धिः भावाधिपे बलयुते पापक्षेत्र अरिनीचगे पु
त्रनाशः एकपुत्रवान् धर्मवान् राजद्वारे राजमूलेन धनव्ययः राहुकेतुयुते सर्पशापात्सुतक्षयः

शुभदृष्टेपरिहारः॥ ॥गुरुषष्ठे॥ ॥शत्रुक्षयः ज्ञातिवृद्धिः पौत्रादिदर्शनंव्रणशरीरः शुभयुते
रोगाभावः पापयुतेपापक्षेत्रेवातशीत्यादिरोगः मंदक्षेत्रेराहुयुतेमहारोगः॥ ॥गुरुसप्तमे॥ ॥
विद्याधनेशः बहुलाभप्रदः पितृाधिकः विद्यावान् पतिव्रताभक्तियुत कलत्रः भावाधिपेब
लहीनेराहुकेतुशनिकुजयुतेपापवीक्षणात् कलत्रांतरं शुभयुतेउच्चस्वक्षेत्रेएकदार वान् कलत्र
देशोबहुवित्तवान्सुखीचतुस्त्रिंशद्वर्षेप्रतिष्ठासिद्धिः॥ ॥गुरुअष्टमे॥ ॥अल्पायुर्नीच
कृत्यकारीपापयुतेपतितः भावाधिपेशुभयुतेरंध्रेदीर्घायुः बलहीनेअल्पायुः पापयुतेसप्तद
शवर्षादुपरिविधवासंगमोभवतिउच्चस्वक्षेत्रेदीर्घायुः बलहीनः अरोगीयोगपौरुषः विद्वान्वेद
शास्त्रविचक्षणः॥ ॥गुरुनवमे॥ ॥धार्मिकः तपस्वीसाधुतारूढः धनिकःपंच त्रिंशद्वत्सक
र्तापितृदीर्घायुः सत्कर्मसिद्धिः अनेकप्रतिष्ठावान्बहुजनपालकः॥ ॥गुरुदशमे॥ ॥धा
र्मिकः शुभकर्मकारीगीतापाठकः योग्यतावान् अनेककीर्तिः बहुजनपूज्यः भावाधिपेबलयु
तेविशेषक्रतुसिद्धिः पापयुतेपापक्षेत्रेकर्मविघ्नः दुष्कृतिः यात्रायांलाभहीनः॥ ॥गुरु

एकादशे॥ ॥विद्वान् धनवान् बहुलाभवान् द्वात्रिंशद्वर्षे अश्वारूढः अनेकमनिष्ठासिद्धिः-
शुभपापयुते गजलाभः भाग्यवृद्धिश्चंद्रयुते निक्षेपलाभः॥ ॥गुरुद्वादशे॥ ॥निर्धनः प-
तितः अल्पपुत्रः गणितशास्त्रः संभोगी ग्रंथिव्रणः अयोग्यः शुभयुते उच्चस्वक्षेत्रे स्वर्गलोक-
प्राप्तिः पापयुते पापलोकः धर्ममूलेन धनव्ययः ब्राह्मणस्त्रीसंभोगी गर्भिणीसंगमी॥ ॥इत्यु-
पदेशसूत्रे भार्गवीये गुरुलग्न भावः॥५॥ ॥लग्ने भार्गवः॥ ॥गणितशास्त्रज्ञः दीर्घायुः
दारप्रियः वस्त्रालंकारप्रियः रूपलावण्यप्रियः गुणवान् स्त्रीप्रियः धनी विद्वान् शुभयुते-
अनेकभूषणवान् स्वर्णकांतिदेहः पापवीक्षितेयुते नीचास्तमयुते चोरवंचनवान् वातश्लेष्मा-
दिरोगः भावाधिपे राहुयुते बृहद्वीजो भवति वाहनेशुभयुते गजांत ऐश्वर्यवान् स्वक्षेत्रे म-
हाराजयोगः रंध्रे अष्टव्ययाधिपे शुक्रे दुर्बले स्त्रीद्वयं चंचलभाग्यः क्रूरबुद्धिः॥ ॥शुक्र
द्वितीये॥ ॥धनवान् कुटुंबी सुभोजनः विनयवान् नेत्रविलासधनवान् सुमुखः दयावा-
न् परोपकारी द्वात्रिंशद्वर्षे उत्तमस्त्रीलाभः भावाधिपे दुर्बले दुस्थाने नेत्रवैपरीत्यं भवति-

भृ० शशियुते निशांधः कुटुंबहीनो नेत्ररोगी धननाशः ॥ ॥शुक्रतृतीये॥ ॥अतिलुब्धः दाक्षि सू०
१ ण्यवान् भ्रातृवृद्धिः संकल्पसिद्धिः पश्चात्सहोदराभावः क्रमेण भ्रातृतत्परः वित्तभोगहृत्तः
भावाधिपे बलयुते उच्चस्वक्षेत्रे भ्रातृवृद्धिः दुस्थाने पापयुते भ्रातृनाशः॥ ॥शुक्रचतुर्थे॥ ॥
शोभनवान् बुद्धिमान् भ्रातृसौख्यं स्फुरवीक्षमावान् त्रिंशद्वर्षे अश्ववाहनप्राप्तिः क्षीरसमृद्धिः -
भावाधिपे बलयुते अश्वांदोलिकादि कनकचतुरंगादिवृद्धिः तत्र पापयुते पापक्षेत्रे अरिनीचगे ब
लहीने सैन्यवाहनहीनः मातृक्लेशवान् कलत्रांतरं॥ ॥शुक्रपंचमे॥ ॥बुद्धिमान् मंत्रीसेना
पतिः मातृमहोदरवान् यौवनदारपुत्रवान् राजसन्मानो मंत्रीवान् स्फज्ञवान् स्त्रीप्रसन्नावृद्धिः
तत्र पापयुते पापक्षेत्रे अरिनीचगे बुद्धिजाड्यः पुत्रनाशः तत्र शुभयुते बुद्धिमान् नीतिपुत्रसि
द्धिवाहनयोगः॥ ॥शुक्रषष्ठे॥ ॥ज्ञातिप्रजासिद्धिः शत्रुक्षयः पुत्रपौत्रवान् अपात्रव्यय
कारी मायावादी रोगवान् अर्थापुत्रवान् भावाधिपे बलयुते शत्रुज्ञातिवृद्धिः शत्रुपापयुते नीच १
स्थे भावेशे दुस्थे शत्रुज्ञातिनाशः॥ ॥शुक्रसप्तमे॥ ॥अतिकामुकः सुखचुंबकः अ-

र्थवान् परदाररतः वाहनवान् सकलकार्यनिपुणः स्त्रीद्वेषी प्रधानजनबंधुसत्कलत्रः पा
पयुते दारानुक्षेत्रे अरिनीचगे कलत्रनाशः विवाहद्वयं बहुपापयुते अनेककलत्रांतरं पुत्रही-
नः शुभयुते उच्चस्वक्षेत्रे अनुकूले कलत्रदेशे बहुवित्तवान् कलत्रमूलेन बहुधा बल्ययोगः स्त्रीगो
ष्ठिः॥ ॥ शुक्राष्टमे ॥ ॥ स्करवीचतुर्थवर्षे मातृगंडः अर्धायुः रोगी हीनदारवान् असंतुष्टः
शुभयुते शुभक्षेत्रे पूर्णायुः स्वत्रपापयुते अल्पायुः॥ ॥ शुक्रे नवमे ॥ ॥ धार्मिकः तपस्वी-
अनुष्ठानपरः पादे बहुलक्षणः धर्मभागवृद्धिः स्वनदारवान् पितृदीर्घायुः तत्रपापयुते पि-
त्र रिष्टवान् तत्र पापयुते पापक्षेत्रे अरिनीचगे धनहानिः गुरुदारगः शुभयुते भाग्यवृद्धिः म
हाराजयोगः वाहनकामेशयुते महाभाग्यवान् अनवंदोल्यादि वाहनवान् वस्त्रालंकारप्रि
यः॥ ॥ शुक्रे दशमे ॥ ॥ बहुमतापवान् सकल्यसिद्धिः शुभकर्मकारी अनेकवाहनवान्-
पापयुते कर्मविघ्नः गुरुबुधचंद्रयुते अनेकवाहनारोहणवान् अनेकक्रतुसिद्धिः दिगंतवि
श्रुतकीर्ति अनेकराजयोग बहुभाग्यवान् वाचालः॥ ॥ शुक्रे एकादशे ॥ ॥ विद्वान् बहु

भृ० धनवान्भूमिलाभः दयावान् शुभयुते अनेकवाहनयोगः पापयुते पापमूलात्धनलाभः भृ०
१० शुभयुते शुभमूलात् नीचर्क्षे पापरंध्रेशादियोगे लाभहीनः॥ ॥शुक्रद्वादशे॥ ॥बहु-
दारिद्र्यवान् पापयुते लुब्धविषयपरः शुभयुक्तश्चेत्बहुधनवान्खाट्याखट्वांगादिसौख्यवा
न्शुभलोकप्राप्तिः पापयुतेनरकप्राप्तिः॥ ॥इत्युपदेशभार्गवीये शुक्रलग्नभावः॥७॥ ॥
पूर्णं पूर्णं तथा मध्ये मध्यमं अंत्ये अल्पं एवं लग्नेरंध्रेशाभ्यां॥ ॥लग्ने मंदे॥ ॥वातपित्तदेहः-
उच्चे पुरग्रामाधिपः धनधान्यसमृद्धिः स्वर्क्षे पितृधनवान् वाहनेशकर्मेशभाग्येशक्षेत्रे बहुभा-
ग्यं महाराजयोगः चंद्रमोहष्टे भिक्षुकोवृत्तिः शुभदृष्टे निवृत्तिः॥ ॥शनिर्द्वितीये॥ ॥द्रव्या-
भावः दारद्वयं पापयुते दारवंदनाभवाधिपः अल्पक्षेत्रवान्नेत्ररोगी॥ ॥शनिस्तृतीये॥ ॥-
भ्रातृहानिसंपन्नः अदृष्टः दुर्वृत्तिः उच्चे स्वक्षेत्रे भ्रातृवृद्धिः तत्र पापयुते भ्रातृद्वेषी॥ ॥शनि-
श्चतुर्थे॥ ॥मातृहानिः॥ ॥द्विमातृवान्सौख्यहानिः निर्धनः उच्चस्वक्षेत्रे न दोषः अत्रवादो- १०
त्यादिरोही लग्नेशोमंदे मातृदीर्घायुः सौख्यवान् रंध्रेशो यात्र रिपुसंस्करतहानिः॥ ॥शनिपं

चमे॥ ॥पुत्रहीनः अतिदारिद्रो दुर्वृत्तिः दत्तपुत्री स्वक्षेत्रे स्त्री प्रजासिद्धिः गुरुदृष्टे स्त्री हृद्यंत्र
थमतः अपुत्रो द्वितीयः बलयुते मंदे स्त्री नैकवान्॥ ॥शनिषष्ठे॥ ॥अल्पज्ञातिः शत्रुक्ष
यः धनधान्यसमृध्धिः कुजयुते देशांतरसंचारी अल्पराजयोगः भंगयोगात् क्वचित्सौख्यं
क्वचिद्योगभंगः रंध्रेशे मंदे अरिष्टवातरोगवृलव्रणादेही॥ ॥शनिसप्तमे॥ ॥शरीरदोषक
रः कलत्रं क्रूरां वेश्यासंभोगवान् अतिदुःखी उच्चस्वक्षेत्रगते अनेकस्त्रीसंभोगी केतुयुतेर-
जस्वलास्त्रीसंभोगी कुजयुते शिश्नचुंबनपरः शुक्रयुते भगचुंबनपरः ब्राम्हणपापापर
स्त्रीसंभोगी॥ ॥शनिरष्टमे॥ ॥क्षिपादायुः दरिद्रो नृहद्स्त्रीरतः सेवकः उच्चस्वक्षेत्रे दीर्घा
युः अरिनीचगे भावाधिपे अल्पायुः कष्टान्नभोगी॥ ॥शनिनवमे॥ ॥पतितः जीर्णो-
द्धारकः नवत्रिंशद्वर्षे तटाकगोपुरनिर्माणकरः उच्चस्वक्षेत्रे पितृदीर्घायुः पापयुते दुर्बले
पित्रारिष्टवान्॥ ॥शनिदशमे॥ ॥पंचविंशतिवर्षे गंगास्नायी अतिलुब्धः पित्तश
रीरी पापयुते कर्मविघ्नः शुभयुते कर्मसिध्धिः॥ ॥शनिरेकादशे॥ ॥बहुधनी विघ्नः भू

भृ० मिलाभः राजपूजकः उच्चस्वक्षेत्रे विद्वान् महाभाग्ययोगः बहुधनी वाहनयोगः॥ ॥शनि सू०
११ र्दशमे॥ ॥पतितः विकलांगः पापयुते नेत्रच्छेदः क्रूरभयुते क्रूरवीक्षते नेत्रः पुण्यलोक
प्राप्तिः पापयुते नरकप्राप्तिः अपात्रव्ययकारी निर्धनः॥ ॥इत्यूपदेशसूत्रे भार्गवी
शनिलग्न भावः॥ ८॥ ॥अथराहुकेतुफलं॥ ॥लग्नेराहुकेतू॥ ॥मृतप्रसूतिः मे
षवृषभकर्कराशिस्थेदयावान् बहुभोगी अक्रूरभे क्रूरभदृष्टे मुखलांछनी॥ ॥राहुकेतुद्वि
तीये॥ ॥निर्धनः देहव्याधिः पुत्रशोकः श्यामवर्णः पापयुते कलत्रद्वयं क्रूरभयुते शुके
लांछनं एवमन्यत्॥ ॥राहुकेतुतृतीये॥ ॥तिलनिष्पाव मुद्गकोद्रव समृद्धिमान् क्रूरभयु
ते कंठलांछनं॥ ॥राहुकेतुचतुर्थे॥ ॥बहुभूषणसमृद्धिः जायाद्वयं सेवकः मातृक्ले-
शः पापयुते निश्चयेन क्रूरभयुते दृष्टे न दोषः॥ ॥राहुकेतुपंचमे॥ ॥पुत्राभावः सर्प-
शापात् सुतक्षयः नागप्रतिष्ठया पुत्रप्राप्तिः पवनव्याधिः दुर्मार्गी राजकोपः दुष्टग्राम- ११
वासी॥ ॥राहुकेतुषष्ठे॥ ॥धीरवान् अतिक्रूरवीइंदुयुते राजस्त्रीसंभोगी निर्धनः चोरः

॥ ॥राहुकेतुसप्तमे॥ ॥दारद्वयंप्रथमनाशः द्वितीयेगुल्मव्याधिः पापयुतेसत्यंशुभ
युतेगंडनिवृत्तिः नियमेनदारद्वयंशुभयुतेएकमेव॥ ॥राहुकेतुअष्टमे॥ ॥अतिरो-
गीह्याग्निवाहूर्षेजीवतिशुभयुतेपञ्चचत्वारिंशाहूर्षेभावाधिपेबलयुतेस्वोच्चेषष्टिवर्षाणि
॥ ॥राहुकेतुनवमे॥ पुत्रहीनः शूद्रस्त्रीसंभोगीसेवकः धर्महीनः॥ ॥राहुकेतुदशमे
॥ ॥विततुसंगमः दुर्ग्रामवासः शुभयुतेनदोषः काव्यवासनः दासीसंप्रदायः॥ ॥राहु
केतुएकादशे॥ ॥पुत्रसमृध्दिः धनधान्यसमृध्दिः॥ ॥राहुकेतुद्वादशे॥ ॥अल्पपुत्रः
नेत्ररोगः पापगतिः॥ ॥इत्युपदेशसूत्रेभार्गवीयेराहुकेतुलग्नभावाष्टमोऽध्यायः ८॥
॥ ॥इतिभृगुसूत्रंसमाप्तं॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

हें पुस्तक पुणें पेठ शनवार मेहुणपुरा येथें रावजी श्रीधर गोंधळेकर याणी आपले जगद्धितेच्छु छाप
खान्यांत छापिलें तारीख २१ माहे जानेवारी सन १८७६ ईसवी. आवृत्ति १ पहिली.

इतिभृगुसूत्रंसमाप्तं.

अथ सटीक समरसारः प्रारभ्यते

स्वसा। ॥श्रीगणेशाय नमः॥ अभिवंद्य रामचंद्रं गुरुं तदुक्तं स्वरग्रंथं॥ विवृणोमि यथा प्रज्ञं तदभिहितार्थानुसारेण॥१॥
१ अत्र श्रीरामचंद्रनामा ग्रंथकृदारीप्सितग्रंथपरिसमाप्तिपारिपंथिप्रत्यूहापोहाय शिष्टाचारपरिपालनाय च गु
रुं प्रणमन् चिकीर्षितं प्रतिजानीते॥ भूरिस्वरशास्त्राणि रुद्रयामलादीनि। युद्ध शब्द उपलक्षणार्थः॥ येन वादि

नत्वा गुरुं समालोच्य स्वरशास्त्राणि भूरिशः॥ वक्ष्ये युद्धजयोपायं धार्मिकानां महीक्षितां॥१॥ बहु
धाविद्धे सदाशिवोत्र स्वरतंत्राणि तदेकवाक्यतां तु॥ भगवानयमेव वेद सम्यक् गुरुमार्गानुगतो
परस्तु लोकः॥२॥ वक्ष्याम्यहं यदिह किंचन सर्वसारमेतावदेव परिचिंत्य नृपः प्रवृत्तः॥ एकोपि को
टिभटलोलपतंगदीपलीलां मुदानुभवतु स्फुटकौतुकेन॥३॥ प्रतिवादिदंपतिसुभटद्यूतकृन्मल्लादीनाम
पि जयपराजयोपायप्रतिपादकत्वमस्य ग्रंथस्य धार्मिकानामिति ग्रंथाप्रमाणशंकानिवारणाय॥ यतः सूपायप्रव
त्तोपि स पापनृपतिः परिपंथिभिः पराभूयते॥ रावणदुर्योधनवत्॥१॥ बहुतरस्वरग्रंथविरोधं गुरुमतमनुसृत्य परिहरति॥२॥ १

स्तनत्ग्रंथप्रतिपाद्यसर्वस्वरशास्त्रसारस्यातिगोप्यत्वमाह॥४॥ अवयगमनायसाधुप्रदेयतामाह॥५॥ ॥॥
संप्रतिप्रकृतमाह॥ इहेयंपरिभाषांकथहणेकरपयवर्गैःपिंडाद्यैरंकाः नत्रखमितिस्वकृतकरणचिंतामणिग्रंथात्

नैतद्देयंदुर्विनीतायजातुज्ञानंगुप्तंतद्धिसम्यक्फलाय॥ अस्थानेहिस्थाप्यमानेववाचांदेवीकोपान्निर्दहेन्नोचिराय॥४॥ विनयावनतायदीपमानाप्रभवेत्कल्पलतेवसत्फलाय॥ उपकृत्यनुचिंतकानिशास्त्राण्युपकारस्यपदंहिसाधुरेव॥५॥ शंमेगंगागतिस्तेदहद्धितदधःसर्गेषंढान्विनाचःकाद्यास्याल्लीपृतेङञमपिस्फभटयोर्नामवर्णोत्थसंख्ये॥ खाद्येशेषेप्यशेषेविजयपरिभवौद्राक्तिशेषेनवस्तेमासाल्लीकारिजेनाक्रमतइहमतोग्योग्यइत्युक्तमाद्यैः॥६॥ }} दाढ्र्तालाघवाय॥ नत्र

शंमेगंगेत्यादिवर्णद्योतितान्पंचाद्यंकानेकादशालीषुऊर्ध्वाधःस्थासुविलिख्यतेषामंकानाम धःअचःस्वरान्
अआइईउऊएऐओऔअंएतान्लिखेत्॥ कथमित्यपेक्षायांसर्गषंढान्विनेति॥ सर्गोविसर्गोक्षरं। अइतितेनऋ

सप्ता० ऌ ॡ इति षंढाख्यस्वरैश्च विनेति संबंधः॥ अत्राजचग्रहणेन यद्यपि अच्प्रत्याहारगता अ इ उ इत्यादिक्रमेण वर्णालभ्यं
२ ते। तथापि सर्वैः षंढान्विनेति उक्तलिंगाद्वर्णसमाम्नायस्थास्वरा अच्छब्देन विवक्षिता इ श्रव्याः॥ एषां स्वराणामधःका
दीन्वर्णान् ङ ञ काररहितत्वेनैकत्रिंशत्संख्याक्तिस्तृष्वालीषुतद्वल्लिखेत् अ क ढ म। आ ख ण य इत्यादि॥ अंत्यो
पांत्यकोष्ठद्वयं तु लेख्यवर्णाभावाच्छून्यमेव स्यात्॥ एवमिदं जयपराजयचक्रमुक्तं॥ एतत्प्रयोजनमाह। सुभ
टयोरिति॥ सुभटावन्योन्यप्रहारिणौ वीरौ॥ अत्रापि सुभटग्रहणमुपलक्षणाय यतो जवादिप्रतिवादिनामपि जय
पराजयज्ञानमितः अतो ययोर्द्वयो र्जयपराजयौ जिज्ञासितौ तयोर्नामस्वरव्यंजनानां ये। शं मे गं मे त्यादि उपरि स्था
अंकास्तान्स्वरो व्यंजनं चाक्षिपति यथा रामरावणयोर्जयपराजयवीक्षायां राम इति नाम्नो रकाराकारमकाराकार
रूपत्वेन चतुरक्षरस्य शकाराद्युपरिस्थाश्चत्वारोंकाः गं ३ मे ५ शा ५ शा ५ एवं सर्वांकमेलनेसंख्या १८ रावणनाम्नि
तु गं ३ मे ५ ग ३ शा ५ मं ५ शं ५ एतदंकमेलनसंख्या २६ एते संख्ये पृथक् पृथक् खकारद्योतितद्व्यं ‾ केनाशे भक्ते यन्ना राम०
मवर्णसंख्या सशेषा नस्य जयः यस्य तु निःशेषा तस्य पराजयः॥ अत्र यद्यपि हे संख्ये निःशेषे तेन रामरावणयोःसा २

न्यमायाति तथापि वक्ष्यमाणचक्रांतरे रामस्यैव जयः प्रागुक्तसंख्ययोरेव प्रकारांतरेण जयपराजयज्ञानमाह।
दास्तीति॥ प्राग्वत् द्वयोर्जयपराजयज्ञानमिष्टं तत्र मः स्वरसंख्ये प्राग्वदानीयाष्ट८भिर्भक्ते। जेष्ठे शेषौ चेन्मवस्त इत्या
द्यंकक्रमेण संभवस्तदाग्रिमाग्रि मांकतुल्यशिष्टनामसं — ख्याजेतेति ज्ञेयमंकास्तु नाद्योदिताः॥०।४।६।५
।७।३।१॥२॥ एष्वंकेषु क्रमस्थेषु यन्नामवर्णसंख्याष्टभागशेषोग्रिमस्तस्य जयः अस्य तु पूर्वस्तस्य पराजयः

अंकास्तुलारि भजतां धस्तुगानकाः स्यू रो१२यैरितोऽक्षरमितीरहिते विधाय॥ तस्मात्पुनर्दहतिशेषबहु
त्वतः स्यात् जेता स एव बलपः सुधिया विधेयः॥७॥

यथा राम रावण संख्ये १८।२६। अष्टभक्ते शेषौ २।२ अ
त्रापि साम्यमेव॥६॥ अपरं जयपराजयचक्रमिदं॥ तुलारीत्याद्येकादशांकास्तिर्यक्कोष्ठेष्वेकादश सुविलिख्य तद
धः अकठमआखणयइत्यादिक्रमेण वर्णा लेख्याः तदनुमानद्वयाक्षरसंख्ये तुलारीत्याद्यंकानुसारादानेये ते द्वा
दश संख्यावियुक्ते कार्ये ते पुनः अष्टभिर्विभज्य पतसंख्याशेषोधिकः स स एव जेता सुधिया राज्ञा स एव जेता बलपः

स॰सा॰ ३ सेनापतिः कर्त्तव्यः उदाहृतिस्तु अत्ररामरावणनामाक्षरसंख्ये प्राग्वत्साधिते यथा राम १७ रावण २८ एते संख्ये हृतादशोने ५।१६। एते ष्ट ८ हृते शेषौ ५।० अत्र श्रीरामचंद्रे जिता॥७॥ अथापरं जयपराजयचक्रमाह॥ अकचटत पशाः कला १६ भूते ५षु ५बाणा ५क्ष ५शर ५ वेदा ४ब्धि ४ संख्या स्वराः अष्टौ वर्गाः तेषां संबंधिनोंकाः दशात्या द्याः ५ अष्टौ विवादास्पदी भूतजय प्रति द्वंद्विद्वय नाम्नोः संबंधि वर्ण वर्गांको नीयुतौ सप्तभिर्भाजितायां यन्नाम वर्णांकशेषो

वर्गाष्टकांकादशतिद्यासंकालारिनद्युतौ॥ नाम्नोः सभाजितायांस्याद्विजयोधिकशेषके॥ ८॥७॥

धिकः स विजयते अल्पशेषस्तु पराभूयते उदाहृतिर्यथा अस्मिन्तृतीयजयपराजयचक्रे राम रावणनामाक्षरसंख्याजी यते रेफः सप्तवर्गीयस्तस्यत्र्यंकोलकारद्योतितः ३ अकारः प्रथमवर्गीयस्तस्याष्टांकोदकारद्योतितः ८ मकारः षष्ठः व र्गीयत्वात्ककारद्योतिनैकांकः १ अकारः प्राग्वदष्टांकः ८ एवं रामनामवर्णसंख्या २९ रावणस्य तु ३४ द्वयोः सप्तमभा गे शेषे६।६ अत्र समशेषत्वादुभयोः साम्यं॥८॥ इति श्रीरामचंद्रविरचितसमरसारसंग्रहटीकायां भरतविरचितायां जय

अथनक्षत्रतिथिवारैः कुलाकुलगणं संधिजयपराजयनिमित्तमाह॥ मूलं १ आर्द्रा २ अभिजित् ३ अंबुपोवरुणस्त्त दैवत्यं भंशतभिषक् ४ एतानिचत्वारि भानिदशमी षष्ठी द्वितीयानिस्त्रस्तिथयः ।। बुधवासरश्च अयंकुलाकुल गणः राज्ञोर्युयुत्सोः संधिकरः द्वयोर्युद्धनिरस्याप्रीतिं करोति अस्मिन्गणे युद्धाद्यारंभे संधिर्भवतीत्यर्थः। कुलगणस्तुव स्यमाणः स्थाय्यिनोः स्थायिनो दुर्गाधीशस्यजयार्थं जयकारीस्यादित्यर्थः सचकुलः मासाख्यास्थितभानिचित्रा वि॰

मूलार्द्राभिजिदंबुपोडुदशमीषष्ठीद्वितीयाबुधो राज्ञोःसंधिकरः कुलाकुलगणः स्थाय्यिनोर्जयार्थंकुलः ॥
मासाख्यास्थितभानिशेषतिथयोयुग्माःकुजोभार्गवःसंघोन्योकुलसंज्ञको विजयते यस्मिन्नयातोध्रुवं॥९॥

शाखा ज्येष्ठापूर्वाषाढा श्रवणपूर्वाभाद्रपदाऽश्विनीकृत्तिकामृगशिरःपुष्यमघोत्तराफाल्गुनीसंज्ञानिद्वादशभानि। च तुर्थीअष्टमीद्वादशीचतुर्दशीतिचतस्त्रस्तिथयोदशम्याद्यपेक्षया शेषभूता युग्माश्च भौमशुक्रवासरौच अयंसर्वःकु लगणः स्थायिजयकृत् अन्यः एतस्मादुक्तभतिथिवारव्यतिरिक्तो गणः अकुलसंज्ञः सचभरणीरोहिणी २ पुनर्वसु ३

स॰ सा॰ आश्लेषा४ पूर्वाफाल्गुनी५ हस्त६ स्वाती७ अनुराधा८ उत्तराषाढा९ धनिष्ठा१० उत्तराभाद्रपदा११ रेवती१२ एता
७ नि द्वादश भानि प्रतिपत्तृतीया पंचमी सप्तमी नवमी एकादशी त्रयोदशी पंचदशी तिथयः रविसोमगुरुशनिवारा
श्चाधमकुलगणाः अस्मिन्गणे प्रारब्धयुद्धादिः प्रयातो यायी ध्रुवं निश्चयेन विजयते इति फलं॥९॥ ॥इति सम
रसारे संग्रहटीकायां कुलाकुलाकुलगणः समाप्तः॥ अथ सकलस्वरशिरोमणिं वर्णस्वरमाह॥ अणएङ् एतौ प्र

पंचाणेङस्वराः कछडधभवमुखेष्वङ् ण ञव्यंजनेषुस्युर्नंदादेस्तिथेस्तेतिथिकपि११ लवतोप्यंतरा
(भोगभाजः॥

त्याहारौ तत्संगृहीताः अइउएओ एते पंच स्वराः कछड धभव एतन्मुखेष्वेतदादिषु वर्णेषु ङका
रणकारञकारवर्जितेषु स्वामिनः क्रमेण स्युर्यथा कछडधभवानां अकारः खजढनमशानामिकारः गझतपय
षानामुकारः घटथफरसानामेकारः चठदबलहानामोकारः तेच अइउएओ एते पंच स्वराः पक्षद्वयसंबंधि रा॰म॰
नंदाभद्राजयारिक्तापूर्णानां तिथीनां क्रमात्स्वामिनः तत्रापि प्रतितिथि कपि ११ लवतः एकादशांशप्रमाणेनै॰ ४

केकस्वरभोगः ततश्चैकस्यां तिथावेकैकस्य स्वरस्य भोगघटी ५ पल २७ प्राण १ गुर्वक्षरोच्चार ७ एवमहोरात्र
व्यापिन्यां षष्टिघट्यात्मिकायां नंदायां प्रातरारभ्य पंचादिघट्यादिकाले अकारस्वरभोगः तदनु तावत्यैव काले
इकारस्य तथैव उ ए ओ एतेषां तावति तावति काले भोगः एवं पंचस्वरभोगकालः घटी २७ पल १६ प्राण २ गुर्व
क्षरोच्चार ७११ पुनरकारादिपंचस्वराणां एतावत्यैव काले भोगः तेन भुक्तघट्यः ५४ पलानि २२ प्राण ४ गुर्वक्ष

नाम्नो बालः कुमारो युव सजर मृतास्त्वादिवर्णस्वरान्ते सिद्ध्युत्कर्षौ युवांतोपचयइतरयोर्ध्यनां हि
एमृतान्वि ॥१०

रोच्चार ५४ ११ पुनरकारभोगः तावत्यैव पंचघट्यादिकाले तेन षष्टिघटिका अहोरात्रजाः पूर्यंते पुनर्भद्रायां ति
थौ प्रातरारभ्य इकारस्य भोगः ततः उकारादीनामेवं जयायामुकारादीनां रिक्तायामेकारादीनां पूर्णायामोकारा
दीनां यस्य स्वरस्य यातिथिस्तस्य तस्य त्रिर्भोगो अन्येषां द्विर्द्विरिति भावः ॥ ॥संप्रति स्वरावस्था आह ॥नाम्न इ
ति ॥स्यायियाय्यादिनाम्नोः पंचआद्यो वर्णः स्तत्स्वामीयअकारादिपंचमध्येस्वरः स बालः तदग्रिमः कुमारस्त

स॰सा॰ दृष्रिमोयुवाअग्रो वृद्धःअग्ग्योमृतःयथारामनाम्नआदिवर्णेरिफस्तदीशएकारस्वरोरामचंद्रस्यबालस्व
५ रआकुमारःअयुवाइवृद्धःउमृतःएवमन्येषांग्राह्याःस्वरादीनामच्युतादिनाम्नांउवर्णाभावादकारादिरेव
वर्णस्वरोग्राह्यःएतत्फलमाह सिद्धीति॥बालस्वरभोगकालारब्धकार्यात्कुमारस्वरभोगकार्येधिकासिद्धिः
॥एवंकुमारकालाद्युवकालेसिद्ध्याधिक्यमितियुवस्वरांतेसिद्धेरुत्कर्षःइतरयोर्वृद्धमृतयोःस्वरयोःसिद्धेरपक

भौमेनयोर्न्नशशिनोम्बगुरोर्भृगोम्बसेत्रेशनेरुदयिनोथनवांशकेजात्॥

र्षः।इतिस्वयुवस्वरभोगकालंज्ञात्वाकार्यारंभःकार्यःएतत्कृत्यमाह॥ ॥द्विषतःशत्रोर्मृताचिमृतस्वरभोग
कालेयुध्यतांयुद्धंक्रियतांस्वयुवस्वरेचतदाजयइतिभावः॥१०॥ अथाकारादीनांग्रहराशीशत्वंतत्तद्राश्या
बुदयंचाह॥ मंगलादित्ययोरेतत्क्षेत्रभूतानांचराशीनांमेषवृश्चिकसिंहानामकारःस्वामीएषुराशिष्वकारउ रा॰ य॰
दितः१एवंबुधचंद्रयोस्तद्राशीनांचकन्यामिथुनकर्कणामिकारःस्वामीएषूदयीच२एवंबृहस्पतेस्तद्रा॰ ५

श्यो र्मीनधनुषोश्च उकारः ३ एवं शुक्रस्यवृषतुलयोरेकारः ४ शनेर्मकरकुंभयोरोकारः ५ अथ नवांशेशत्व माहाथ इति ॥ अजान्मेषमारभ्य तेन मेषादि द्वादशराशीनां नवांशकाः १०८ तेषां मध्ये मेषवृषयो १८ र्नवांशकेषु मिथुनस्याद्यषट् ६ नवांशकेषु चाकार ईशः मिथुनांत्यत्रिनवांशकेषु कर्कसिंहयोश्चाष्टादश १८ सु चेकारः २ कन्यातुलयोर्वृश्चिकाद्यत्रये चोकारः ३ वृश्चिकान्त्यषट्के धनुषि मकरांत्यषट्के चैकारः ४ मकरांत्यत्रये कुंभमीनयोश्चौ

भात्२४ कात्२१नुपरतोंतिमभादि सप्तस्वादित्यतस्त्विदुमुखा आपिपंचकेषु ॥ ११ ॥

कारः ५ एवं भात् २४ मेषादिचतुर्विंशतिनवांशकानां अकार ईशः परतस्तदग्रिमेषु कात् एकविंशत्ये ॥ २१ ॥ कविंशति संख्यानां नवांशानां इकाराद्याः क्रमात्स्युः अथ नक्षत्रेश त्व माह ॥ अंतिमेति ॥ अंतिमं भं रेवती तदादि सप्तस्वर्क्षेषु नक्षत्रेषु अकारः प्रभुः आदित्यं पुनर्वसुः तत आरभ्य पंचसु पंचसु इदुमुखाः ॥ इकारो कारााद्याः स्वराः ईशाः एवं सप्तविंशति भानां पंचस्वरा ईशाः ॥ ११ ॥ ॥ ॥ ॥ ॥

स॰सा ॥अथसंवत्सरेशत्वंपंचानामाह॥ रूपा१२व्यांद्वादशवर्षेषुप्रभवादिबहुधान्यांतेषुसंवत्सरेष्वकारईशः प्रमा
६ थ्यादिद्वादशाब्देषुइकारःखरादिषूकारःशोभनादिष्वेकारः राक्षसादिष्वोकारः॥त्तीशमाहहायनेति॥ हायनः
संवत्सरः तस्यर्तवः षड्वसंताद्यास्तेषुतेअकाराद्यः ईशाः षड्टतुदिनानिसौरमानेनपंचशक्युत्तरत्रिशती
तद्विभागस्तुमासौ २दिन ६ए एकैकस्यभुक्तिरेवंषडृतवोभुक्ताः स्युर्द्वादशवार्षिकभोगेऋतुभोगेवाअवांतर

रूपाभ्व्यामथहायनर्तुषुचतेतत्काय११भागांतराद्भुक्त्याबाप्यथ्यनेत्वइरिमोरूष्णान्ययोः पक्षयोः॥रा
धेभाद्रपदेसहस्यइरिषाषाढेनभस्युर्मधौपौषेथैरपिशुक्रऊर्जेउदयीमाघांत्ययोरोस्तथा ॥१२॥

भोगमाह तत्कायेति ११ तेषांरूपाब्दानामृतूनांचकायैः ११भोगैर्लब्धकालएकैकस्वरावांतरभोगेनावांतरभुक्त्याभु
त्वमित्यर्थः॥द्वादशाब्दविभागोयथावर्ष १मास १२घटी ४३पल ३८प्राण १गुर्वक्षरोच्चार १ इतिऋतुभोगदिनेषु७३ए राम
ष्वेकादशांशोवांतरभोगः विभागस्तुदिन ६११घटी ४३पल ३८ इतिप्रतिस्वरभोगकालः॥ अथायनेशत्वमाह॥ ॥ ६

अवाचीति अवाग्विदक्षिणायने अवेउत्तरायणेएतयोर्द्वयोरयनयोरकारेकारावीशौनापरेस्वराः पक्षेशत्वमाह॥ ॥इमाविति इमौअकारेकारौकृष्णान्ययोः कृष्णशुक्लपक्षयोरीशौमासेशत्वमाह॥ ॥राधइति राधोवैशाखः तस्मिन् भाद्रपदेसहामार्गशीर्षस्तस्मिंश्चाकारःप्रभुःइइकारः इषेआश्विने आषाढेनभसिश्रावणेचप्रभुः उःउकारः मधौचैत्रेपौषेचेशःएःएकारः शुक्रेज्येष्ठेऊर्जेकार्त्तिकेचेशः माघांत्ययोः माघःप्रसिद्धः अंत्यः फाल्गु

मात्रानामसुखार्णजेवतुतद्वन्मंत्रादिसिद्धोहलच्संख्येक्यतप१६संख्ययाप्तुभि४यशोःकाद्येमि५जीवाख्युभे॥

नः तयोः — — — ओकारःस्वामी अवांतरभोगइहापिप्राग्वत्ज्ञेयः॥ ॥एतावतावर्णस्वरःप्रपंचितः॥ ॥इति वर्णस्वरचक्रं॥ अथ मात्रास्वरावाह॥ ॥नाममुखंनाम्न आरंभः तत्रयोर्णोवर्णः — — — — तज्जतायास्वरमात्रासमात्रा स्वरःसचासावच्चतदच् मात्राजित्यर्थः। सचमंत्रादिसाधनकर्मस्वनुकूलोग्राह्यः॥ ॥जीवस्वरमाह॥ ॥हलजितिनाम्नोयेहलाःअचश्चतेषांयेवस्यमात्रावर्गापेक्षयासंख्येतयोरैक्यंजीवस्वरोभवतिसचशु

स·सा भेमंगलकृतेग्राह्यः पंचाधिकाचेत्तत्संख्या तदा पंच ५ भिर्भागोऽनुपदिष्टोपि कार्यः भागेयः ५
७ शिष्टांकस्तत्संख्याएवाकारादि पंचसुस्वरोग्राह्यः शून्यशेषेतुपंचमः ओकारएवग्रा
ह्यः। अस्यचजीवस्वरसंख्याकिंस्थानस्थेषुवर्गेषुस्यादित्यपेक्षायामाह नप इति अ
सुस्वरेषुनपसंख्यया षोडशसंख्ययाव्यवछिन्नेषु अआइईउऊऋॠऌॡएऐओऔ

पिंडान्मात्रिकवार्णिकैक्यमपूत्हृते शेषश्चमूसत्कृतोमात्रार्णग्रहपिंड
जीवभग्रहाजैक्यान्मत्हृद्यौगिकः॥ १३॥ { अंअः। इतियशोः यवर्गशवर्गयो

र्भिः चतुःसंख्ययोः सतोरित्यर्थः। काद्येकवर्गाद्ये वर्गजाले कचटतपरूपेमिपूमितिः प्र
त्येकंपंचाक्षरमितिरित्यर्थः। वैशेषाय जीवस्वरचक्रमेवलिख्यते यथाअत्रोदाहरणं॥

रामनाम्नः रेफाकारमकाराकाररूपत्वात् द्विद्विपंचैकसंख्यैक्यं १० पंचभागेशिष्टंशून्यं

अ	आ	इ	ई	उ	ऊ	ऋ	ॠ
१	२	३	४	५	६	७	८
ऌ	ॡ	ए	ऐ	ओ	औ	अं	अः
९	१०	११	१२	१३	१४	१५	१६
क	ख	ग	घ	ङ	च	छ	ज
१	२	३	४	५	१	२	३
४	५	१	२	३	४	५	१
झ	ञ	ट	ठ	ड	ढ	ण	त
२	३	४	५	१	२	३	४
थ	द	ध	न	प	फ	ब	भ
म	य	र	ल	व	श	ष	सह
५	१	२	३	४	१	२	३ ४

राम· ७

न्यं तेन रामचंद्रस्यौकार एव जीवस्वरः पिंडस्वरमाह। पिंडेति मात्रिको मात्रास्वरः वार्णिको वर्णस्वरः तत्संख्ययोरैक्ये
मत्कृते पंचहृते यः शेषः स पिंडाख्यः पिंडस्वरो भवतीति संबंधः। सच स्वाः सेनायाः सत्कृतौ सत्कारे सज्जीकरणे ग्राह्यः उदा
हरणं यथा रामस्य वर्णस्वर एकारश्चतुर्थत्वात् चतुःसंख्या मात्रास्वरस्त्वकारः प्राथम्यादेकसंख्यः तयोरैक्यं ५ म
पंचभागशेषे शून्यं ततओकारस्वर एव श्रीरामस्य पिंडस्वरः। अथ यौगिकस्वरमाह। मात्रेति। मात्रास्वरः वर्णस्वरश्च प्रागुक्त
ग्रहस्वरस्तु तन्नाम राशीश ग्रह संबंधात्। ३ पिंडस्वरः प्रागुक्तः ४ जीवस्वरश्च ५ भं जन्मनक्षत्रं तदधिपस्वरः ६ ग्र
हं राशिस्तस्य यो ऽच् ७ एषां मात्रादिस्वराणां याः संख्याः तासामैक्यं महत् तं पंचभिर्भक्ते शिष्टो यौगिकस्वरः यथा
रामचंद्रस्य यौगिकस्वरः साध्यते मात्रास्वरः अकारः प्राथम्यादेकसंख्यः १ वर्णस्वर एकारः चतुःसंख्यः ४ ग्रहस्व
रस्तु रामनाम्नस्तुला राशित्वात्तस्येशः शुक्रः तस्य स्वर एकारः ४ पिंडस्वरस्तु प्राग्रीत्या ओकारः ५ जीवस्वर ओकार
एव ५ नक्षत्रस्वरोपि अवकहडचक्रानुसारात् रामचंद्रस्य चित्रानक्षत्रत्वात् स्वर उकारः ३ राशिस्तु रामस्य तुला
तत्स्वर एकारः ४ एतत्संख्यैक्यं २६ पंचभागे शिष्टं १ अत्र अकारो रामचंद्रस्य यौगिकस्वरः ॥ १३॥ ॥ ॥

योगवर्णस्वरयोर्विनियोगादि॒त्वानीं तयोः कार्यमाह॥ योगाचा यौगिकस्वरेण योगभजनं योगमार्गसेवनं तदुदये तत्काले तद्युवत्वे कुर्वीतेति भावः वर्णाचा वर्णस्वरेण सर्वकर्म आवहेत् कुर्यात् विशेषतस्तु वर्णस्वरानुकूल्ये संग्रामं कुर्यात् हि यस्मात्सर्वस्वराणामग्रणीः मुख्यः॥१५॥ अथ भटादीनां युद्धादौ जयपराजयसाम्यज्ञानमाह। तेषां अइउएओ इति प्रागुक्तानां पंचानां स्वराणां तत्संबंधिनां हलां च संबंधिनीमितिः संख्या ल३ य१ भ४ रा२ य१ एवंरूपा स्यात् तेन अक

योगाचा योगभजनं वर्णाचा सर्वमावहेत्॥ विशेषतश्च संग्रामं स हि सर्वस्वराग्रणीः॥१४॥
तेषामचां लयभरायमिति हलां च नाम्नोरलां तु मिलितानामन्ह नापृथक् सा॥ ॥ ॥

छुडधभवानां ल३ इति त्रिसंख्या ३ खजठनमशानां य इति एकं १ संख्या डगझतपयषाणां भ इतिः चतुः संख्या ४ एघटथफरसानां रा इति द्विसंख्या ओचदद्वलहानां य एकसंख्या १ भवति नाम्नोर्य योर्जयपराजयज्ञानमिष्टं तन्नाम्नोर्ये अल इति प्रत्याहारग्रहणात् स्वरा वर्णाश्च तेषां संबंधिनी या संख्या लयभरायेत्युक्ता प्रतिस्वं मिलिता सती पृथक्

मैः पंचभिर्हृताचयास्यात् ॥ सदाविजयमाह। अधिकनामसंख्यस्यसासंख्येतरे तरंतु
ल्यासमाचेत्तदातुल्यंसमंसंग्राममाह। यदिवापक्षांतरेसंबंधिद्वयोः राज्ञोः संधिमाह
अत्रवर्णसंख्याग्रहणेननिषिद्धवर्णानांङकारणकारादीनांनाम्निसंभवेसंबंधेवाशू
न्यमेवग्राह्यं नकदाचित्संख्याउद्दिष्टवर्णाभावात्॥ उदाहरणं॥ यथारामसंख्या९ रा५

हीनाम्रतिंविजयमाहतथाधिकासातुल्यासमंचसमरंयदिवापिसंधिम्॥१५
पूर्वादिदिक्ष्वंनरगास्तनेचः सुखंजयेद्यूनिजयस्तुघातात्॥ ७ ॥ ७ ॥

व६णकारस्याभावाच्छून्यंतद्कारस्य३ एवंरावणनामसंख्या १४ यासाउभयत्रपंचभागेशेषो
४।४ अत्रयुद्धेसंधिर्वाच्या॥१५॥ इतिश्रीभरतकृतसमरसारटीकायांस्वरभेदोयुद्धकालेज
यपराजयौच॥ अथवालकुमारादिस्वरवशाद्बलमाह॥ तेअकारादयोऽचः स्वराः पूर्वादिदि

ल	य	भ	श	व
२	१	४	२	१
अ	इ	उ	ए	ओ
क	ख	ग	घ	च
छ	ज	झ	ट	ठ
ड	ढ	त	थ	द
ध	न	प	फ	ब
भ	म	य	र	ल
व	श	ष	स	ह
०	०	०	०	०

स्तुमध्येच भागेसमायायुद्धस्थानादेश्वसन्निविष्टाज्ञातव्याः तत्रयूनियुवस्वर विषयेजयेत् निजयुवस्वरदिशमाश्रितोभटःसुखंजयेत् इतितात्पर्यार्थः आ द्ययोस्तु बालकुमारयोर्घातादूनंतरं घातेप्रहारेलग्नेसतिजयःपर्यंततः स्यादि त्यर्थः अंतिमयोर्वृद्धमृतयोर्जयोनस्यात् स्वशत्रुबलाबलाभ्यांस्वेयुवस्वरदि

स्यादाद्ययोर्नांतिमयोःस्वशत्रुबलाबलाभ्यां
बलमाददीत॥ १६ ॥ ७ ॥ ७ ॥ ॥

शुक्रगृहं ईशान तुलावृषौ	भौमगृहं पूर्व मेषवृश्चिकौ	शनिगृहं अग्निः मकरकुंभौ
जीवगृहं उत्तर मीनः	ग्रहराशि चक्रम्	रविगृहं दक्षिण सिंहः
बुधगृहं वायव्य कन्यामिथुने	चंद्रगृहं पश्चिम कर्क	जीवगृहं नैर्ऋतिः धनुः

शंशत्रुंमृतस्वरदिशंप्रापय्यंकृत्वाइत्थंस्वस्यस्वरबलेशत्रोस्तुबलाभावेयुद्धवादाद्य र्थितांदिशमाददीत तत्रस्थित्वायुद्धादिकुर्यात् उदाहरणं अत्ररामरावणयोरेकारस्व रोबालस्तद्दिक्चउत्तराअतस्तयोःप्राच्यांयुवस्वरस्तद्दिशिरामरावणयोर्बलं॥इतिभूबलज्ञानं॥१६॥

	पूर्व अ	
उ ए	मध्ये ओ	इ ई
	प॰ ऊ	

अथरविचन्द्रहृतिंविवसुस्तत्तद्गृहराशीनांदिग्विशेषेनिवेशमाह॥ऐशानींदिशामारभ्यप्राच्यादिदिक्क्रमेण अग्निमावि वसिताः तासुशुक्रादिगृहभूताराशयोनिविष्टाज्ञेयाः यथाशुक्रराशीवृषतुले तौई शान्याम्॥ मंगलस्यराशीमेषवृश्चिकौतौप्राच्यांशनेर्मकरकुंभौआग्नेय्यां रविगृहं सिंहस्रदक्षिणस्यां इंदोर्गृहंकर्कः प्रतीच्यांगुरुगृहेधनुर्मीनौतयोरक्षोदिक्नैर्ऋ

ई॰ शु॰ वृ॰ तु	पू॰ भौ मे वृ॰	अ॰ श॰ म॰ कुं
उ॰ गु॰ मी		द॰ सू सिं॰
वा बु॰ मि॰ कं	प॰ चं कर्क	गु॰ नै॰ ध

ऐशानीतःसितकुजशनिरविगृहराशयः प्रतीचीन्दोः॥गुरुगृहयोरसउ दग्दिशौज्ञगृहयोस्तुवायव्यां॥१७॥द्वितीययामार्द्धतएवयामेयामेत्रनीयां चतस्तत्तनीयां॥ } नीउदीचीचदिक्क्रमेणज्ञेयाज्ञोबुधस्तस्यगृहेकन्यामिथुनेतयोर्वायव्यां॥१७॥ अथैतादिशाएतेराशयश्चप्रथमादि प्रहरेषुत्याज्याः यथाइतिच

क्रम्॥ अथरविहृतांदिशामाह॥ अर्कःसूर्योदिनेद्वितीययामार्द्धतःद्वितीयश्चासौयामार्द्धश्चेतिद्वितीययामार्द्धतः

प्रथमातिक्रमे कारणाभावात् प्रथमयामस्यार्द्धं तदारभ्य प्रथमयामस्य द्वितीययामार्द्धमारभ्यते इत्यर्थः॥ यामे यामे प्रहरे प्रहरे तृतीयां तृतीयां दिशं हंति कां दिशमारभ्येत्यपेक्षायां चाह प्रतीचीप्रभृतीति सर्वदिगपेक्षया बहुलं तेन प्रथम द्वितीययामयोरंत्याद्याभ्यां प्रतीचीं द्वितीयतृतीययोरंत्याद्याभ्यां उदीचीं तृतीयचतुर्थोरंत्याद्याभ्यां प्राचीं तुर्यांत्याद्याभ्यां याम्यां हंतीति

	स्त्रू २ ४ अंआ ५ ५	
उ स्त्रू २ २ अंआ ५ ५	रविच क्रम्	द· स्त्रू २ १ १ ५ आ· अं ५ ५
	प सू १ २ अंआ ४ ५	

अर्कः प्रतीचीप्रभृतिं निहंति प्रागंत्ययामार्द्धयुगेन याम्यां।१८॥
ईशाद्विदिशां चंद्रो यामे यामे निहंति वृषकुंभौ॥ ५९ ॥ ॥

ईशानी वृ· चं कुं १ यामे·		चं· द्वि· म सिं· २ यामे
	चंद्रहत राशिज्ञानार्थं चक्रम्	
वा· चं· मि· कुं· ४ यामे		नै· चं· धनु· ३ यामे

भावः एवं रविदग्धादिशास्तात्काले शुभकर्म सुत्याज्याः ॥१८॥ अथ चंद्रहता विदिग्दिशस्तद्राशींश्चाह॥ चंद्र ईशाद्विदिशां ईशानादिविदिशासंबंधिनौ राशी दिने यामे यामे प्रहरमात्रे काले निहंति कौ तावित्याह वृषकुंभौ ईशानाग्नीस्थौ प्रथमप्रहरे हंति मृगो मकरस्तं चाग्नीयीस्थं ॥ ॥ ॥

सिंहंचदक्षिणादिक्स्थंद्वितीययामेनिहंतिधन्विधनः नैर्ऋतिदिक्स्थंतृतीययामेनिहंतिकन्यामिथुनेवायव्यदिक्स्थे
तुर्ययामेहंति एवंऐशानीतः क्रमेणविदिशोदक्षिणाचदिक्तत्रस्थिताराशयोचंद्रमसाप्रथमप्रहरमारभ्ययामच
तुष्टयेहताः स्युः अतएतादिशस्तेराशयश्चप्रथमादिप्रहरेषुत्याज्याः॥१९॥ इतिचंद्राह
तराशयोविदिशश्चेति॥ अथगूढापराख्यकेतुहतदिग्विदिशआह॥ गूढानामाग्रहभेदोः

मृगसिंहौधन्वितथाकन्यामिथुनेक्रमेणैव॥१९॥ गूढाख्योःर्द्धप्रहरैराग्नेयीतस्त
थादिवानिशिच॥ षष्ठींषष्ठींहन्यात्तन्मुखयात्राशुभानरणे ॥२०॥ ७॥ ॥

ई. ७ राहुः ४	पू. ४ राहुः ४	अ. १ राहुः ४
उ. २ राहुः ४	राहुचक्रम्	द. ६ राहुः ४
वा. ५ राहुः ४	प. ८ राहुः ४	नै. ३ राहुः ४

र्द्धप्रहरैःषोडशसंख्यैर्दिनरात्रिसंबंधिभिराग्नेयींदिशमारभ्यषष्ठींषष्ठींदिशंप्रहराद्धींशेनदिने
रात्रौचहन्यात्।ततश्चद्युनिशोर्वारद्वयेनैकैकादिक्हताभवति अतोगूढहतदिक्सन्मुखेनतद्दिक्स्थरिपूपरियात्रैवशुभा
नतुतस्यांदिशिस्थित्वारणःकार्यःअहितत्वात् दिक्क्रमसंकेतस्तु आउनैपूवादईप इतिदर्शनं एतादिशोविदिशश्चदिवा
निशांवर्ज्याः॥२०॥ इतिगूढं॥

स·सा·
११

॥ ॥अथरविचंद्रयोः पृष्टदक्षिणदिशिस्थितौ सत्यां यायिस्थायिनोर्जयपराजयावाह॥ यायिनः स्थायिनोपि
अर्कोयदिदिने पृष्टप्रदेशे दक्षिणप्रदेशे वास्यात्तदाछाया पुरतः स्वाग्रप्रदेशे वा मप्रदेशे वा चेत्तदाच यायिस्थायिनोर्ज
यः किंत्वयं विशेषः अर्केवहतिदक्षिणभागस्थपिंगलाख्यरविन्यां प्राणवायौ वहत्यर्केच पृष्टदक्षस्थेयायिनिजयोन
स्थायिनि पृष्टदक्षस्थे अर्केविधौचंद्रमसि वाहस्थे वहति वामभागस्थे डाख्यचंद्रनाड्यां प्राणवायौ वहतिस्थायिनि

	स्था· पू· सू· पृ र·	
उ· सू· २ दं· स्था		सू· द· दपि या
	या प सू· पृ पि·	

पृष्टेर्कोयदिदक्षिणेपि पुरतः छायाथवामेजयः किन्त्वर्केवहती
हयायिनिविधौवाहस्थितेस्थायिनि॥ ७ ॥ ७ ॥ ॥

	पू· चं· अ· स्था ३	
उ· वा स्था· पि च		द चं वा ३ या
	प अ ३ चं या	

जयः निशिरात्रौतु शशीचंद्रोनिज वामेग्रतो वा चेत्तदा छाया स्वपृष्टप्रवेशे
स्वदक्षप्रवेशेच गच्छति तदा यायिस्थायिनोर्जयोयं तु विशेषः वामाग्रते·
चंद्रे चंद्रनाडीवहेच यायिनोजयः नस्थायिनः परस्य स्थायिनस्तु वामाग्र

राम
११

गेचंद्रमसिसूर्यनाडीवहेचजयः नयायिनः क्षयीक्षयपक्षेकृष्णपक्षेगतः शशीचंद्रोवामएवेष्टः ॥२१॥ अथप्रागुदीच्यादिदिग्गवस्थितार्कचंद्रवशात्स्थायियायिनोर्जयपराजयावाह॥ स्पष्टार्थः उदागमनंतूत्तरायणगतस्य चंद्रमसः स्वमध्यान्हे स्वार्द्धादुत्तरतोगतिः संभवतीति इतिरवीन्दुगूढछायाबलानि ॥ अथवायुबलमाह॥ ॥

	प्राची· चंद्र	
उदीची चं· स्थायी		दक्षिणा चंद्रः
	प्रतीची चंद्रः	

प्राच्यादिगतचंद्रचक्रमिति·

छायापृष्टगदक्षिणानिशिशशीवामेग्रतोवाजयोयातश्चं
द्रवहेपरस्यतुरवेर्वामःशशीष्टःक्षयी॥२१॥ प्राचीमुदी
चींवाचंद्रेगतेस्थायीजयीभवेत्॥ प्रतीचींदक्षिणांप्राप्ते
यायीविजयमाप्नुयात्॥२२॥ ७ ॥ ७ ॥ ॥

वायुबलचक्रमिदं

	पू· वायुः	
उ· वायुः		द· वायुः
	प· वायुः	

पृष्टेदक्षेचवहन्वायुःबलंसूचयति यथाप्राङ्मुखस्यपाश्चात्योदाक्षिणात्योवायुर्बलसूचकः सम्मुखीनः सम्मुखेवहन् वामश्चभटानांभंगंपराजयंसूचयति॥ इतिवायुबलम् ॥ २२ ॥ ७ ॥ ॥

स·सा· ॥ अथराहुबलमाह॥ अगुः राहुः यामार्द्धैः प्राग्वातांतकशिवप्रत्यक् वन्हिउत्तरनैर्ऋतिदिशः एतिकथमित्य
१२ पेक्षनेषष्ठींषष्ठीमितिप्राच्यादिदिशोगळन्षष्ठींषष्ठींदिशंयाति नतुक्रमेणसचराहुः अर्कवत्पृष्ठेदक्षेचहितःवल
दः अयंभावः राहुः प्रातरारभ्ययामार्द्धंप्राच्यांतिष्ठतितदनुषष्ठीदिशावायव्यातस्यांयामार्द्धंतिष्ठतिततःषष्ठीदि

राहोर्दिनवारचक्रम्		
ई· रा ४ ४	पू· रा·१ ४	अ· रा·६ ४
उ·७ रा ४	राहुचक्रं	द· रा ३ ४
वा· रा २ ६	प· रा ४ ५	नै· रा ८ ४ ३

वायुः पृष्ठेदक्षिणेचवहन्स्तूचयतेबलं॥ सम्मुखीनश्चवामश्चभदानां
भंगस्सूचकः ॥२३॥ प्राग्वातांतकशंभुपाशिहुतभुक्पौलस्त्यरक्षो
दिशो यामार्द्धैरगुरन्हिपाशिककुभोसौषष्ठिषष्ठींनिशि॥ ७ ॥ ॥

राहोः रात्रिवारचक्रं		
ई· रा ४ ८	पू· रा·४ ५	अ रा·२ ५
उ· रा ४ ४	राहु चक्रं	द· रा·७ ६
वा· रा ६ ४	प· रा· १ ४	नै· रा· ५ ४

ग्दक्षिणातस्यांयामार्द्धंततईशदिशिएवंक्रमेणषष्ठींषष्ठींदिशंयामार्द्धंयामा
र्द्धंयातिसचसकलकार्येषुपृष्ठस्थोदक्षिणभागस्थः शुभः अन्यत्राशुभः एवंदिवाराहुश्चारउक्तः
निशितुपाशिककुभः पश्चिमदिशआरभ्यषष्ठींषष्ठींप्रहरार्द्धैरेतितेनैवपूर्वोदयः पश्चिमाग्नेयोत्तरनैर्ऋत्यपूर्ववाय व्यदक्षिणेशादिशि इत्यर्थः॥

अथद्विघटिकोमुहूर्तिकोराहुः प्रातरारभ्यैशानीतश्चतुर्थंचतुर्थंदिशंमुहूर्त्तेमुहूर्त्तेयातिदिनरात्रौद्वात्रिंशन्मुहूर्त्तौ अष्टदिशांचत्वारोभ्रमास्तत्रक्रमः ऐशानदक्षिणवायव्यपूर्वनैर्ऋतोत्तराग्नेयपश्चिमासुक्रमेणन्यासत्रयं ॥२४॥इति राहुबलकथनं ॥ ॥अथयोगिनीबलमाह॥ योगिनीप्रागुदग्वह्नीत्याद्युक्तक्रमेणदिक्षुदर्शांतैः प्रदिपदादिअमावास्यापर्यंतैस्तिथिभिः तिथिद्लजदर्शांततिथ्यर्द्धयामार्द्धैर्दर्शोऽमावास्या

ई॰ महालक्ष्मी ८।१६	पू॰ ब्राह्मी १।९	अ॰ कौमारी ३।११
उ॰ माहेश्वरी २।१०	योगिनीचक्रम्	द॰ वाराही ५।१३
वा॰ चंडिका ७।१५	प॰ ऐन्द्री ६।१४	नै॰ वैष्णवी ४।१२

ई॰ रा १	पू॰ रा॰४	अ॰ रा॰७
उ॰ रा॰६	मुहूर्त्त राहुः	द॰ रा॰२
वा॰ रा॰३	प॰ रा॰८	नै॰ रा॰५

पृष्ठेदक्षिणतःशुभोद्विघटिकोसौतुर्यंतुर्यंव्रजन्नीशावाक्यवनेंद्रराक्षसहिमगवह्निप्रतीचीर्दिशः ॥२४॥ प्राक्सोमानलरक्षोवारुण्याशीवायवेशदिक्षुदर्शान्तैः॥ {} स्तदंतायास्तिथयस्तासांयदर्द्धंपूर्वंएत दतिक्रमेकारणाभावात्तस्मिन्येयामार्द्धोअर्द्धप्रहरा अष्टसंख्यास्तैः कृत्वेतिसंबंधः एवंद्वितीयार्द्धेपितिथीनांरात्रौयोगिनीप्रागुक्तदिक्क्रमेणैतिसाचार्कवत्पृष्ठेदक्षिणेचशुभफलदाअयंभावः प्रतिपदाद्यष्टम्यं:

बाबूवाराणसीप्रसादया कचौरीगलीमे भाईप्रतापसिंहजीकेदुकानपरमिलेगी ताः१५माहेअगष्ट सन१८७६ई०

संवत्१९३३

अथकेरलप्रश्नाःप्रारभ्यंते

श्रीगणेशायनमः॥ सासात्रैलोक्यबोधायप्रश्नकेरलभाषितं॥ त्रिकालविषयंप्रोक्तं तस्मैकेरलयेन
मः॥१॥ ज्ञानदीपकमासाद्यवर्तिंकृत्वासदक्षरैः॥ स्वरस्नेहेनसंयोज्यज्वलयेदुत्तरेंधनैः॥२॥ यदुपचि
तमन्यजन्मनिशुभाशुभंतस्यकर्मणःप्राप्तिं॥ व्यंजयतिशास्त्रमेतत्तमसिद्रव्याणिदीपइव॥३॥ लो
कस्यैवहितार्थायदिव्यचूडामणिर्मया॥ वक्ष्यतेविबुधार्थानांशृणुत्वंस्थिरचेतसा॥४॥ चित्तेयत्नंधातु
बहुंशरीरंनष्टेचित्तेधातवोयांतिनाशं॥ तस्माच्चित्तंयत्नतोरक्षणीयंस्वस्थेचित्तेबुद्धयःसंभवंति॥५॥ नैतद्दे
यंदुर्विनितायजातुज्ञानंगुप्तंतद्धिसम्यक्फलाय॥ अस्थानेहिस्थाप्यमानेववाचांदेवीकोपान्निर्दहेन्नो
चिराय॥६॥ विलयावननायदीयमानाप्रभवेत्कल्पलुतेवसत्फलाय॥ उपकृत्यनुचितकानिशास्त्राण्युपरस्यपदेहिसा
धुरेव॥७॥ अनर्थेचाप्यविश्वासेचानाशेफलवर्जिते॥ भक्त्याविवर्जितेजीवेनचफलतिशास्त्रकं॥८॥ अथप्रश्नंवक्ष्ये॥ पृ
च्छकस्यवाक्याक्षराणिअकारादिस्वरसंयुक्तानिग्राह्याणि। यदिचेदक्षराणिअधिकानिभवंति॥ तदाब्राह्मणप्रश्नेब्रा
ह्मणंप्रतिवदेत्त्वंश्वेतपुष्पाणांमध्येकिमपिपुष्पंकथय॥ क्षत्रियंप्रतिवदेत्त्वंस्त्रीसंज्ञिकायानद्यःसंतितासांमध्येकाम

पिनदींकथय॥ वैश्यंप्रतिवदेत्वंदेवालयेदेवाःसंतितेषांमध्येकमपिदेवं
वद॥ शूद्रंप्रतिवदेत्वमनेकानिफलानिसंतितेषांमध्येकिमपिफलंवद॥ पुनःप्रश्नंविचारयेत्॥ अथा-ष्ट
विधप्रश्नंवक्ष्ये॥ संयुक्तं१ असंयुक्तं२ अभिहितं३ अनभिहितं४ अभिघातिकं५ आलिंगितं६ अभिधूमितं
७ दग्धं८ एतेषांलक्षणं॥ यदिप्रष्टाप्रश्नसमयेस्वकायंस्पृष्ट्वापृच्छतितत्संयुक्तंप्रश्नंलाभकरं॥ यदिपथि
शयानेडोलागजरथतुरंगारूढोभवतिभावरहितेफलद्रव्यविवर्जितेनरेपृच्छतितदाऽसंयुक्तंप्रश्नं२ बहु
दिनानंतरंलाभादिसुखंभवति॥ यदिप्रष्टाप्रश्नसमयेवामहस्तेनवामांगेस्पृशतितदाऽभिहितंप्रश्नं३ अला
भकरंभवति॥ यदिप्रष्टाप्रश्नसमयेस्वहस्तेनपरकायंस्पृशतितदाऽनभिहितंप्रश्नं४ कार्यस्याःलाभकरं
भवति॥ यदिप्रष्टाप्रश्नसमयेमस्तककटिहृदयंहस्तंपादंचमर्द्दयेत्तदाऽभिघातिकंप्रश्नं५ शोकसंताप
कारकंभवति॥ यदिप्रष्टाप्रश्नसमयेदक्षिणपाणिनानिजतनुंस्पृशतिदक्षिणांगंतदाऽलिंगितंप्रश्नं६ ला
भसुखादिकारकंभवति॥ यदिप्रष्टाप्रश्नसमयेदक्षिणकरेणवामकरेणसर्वांगंस्पृशतितदाऽभिधूमितं

 प्रश्नं ७ किंचिल्लाभकरं मित्राद्यागमनंच॥ यदिप्रष्टाप्रश्नसमये रोदनदुःखभयार्तिजलनीचस्थलसन्निधौभ
 क्तिभावरहितः पृच्छतितदादग्धंप्रश्नमुदाहृतं। यदिप्रश्नसमयेकुर्कुरवामकाणखंजनकुब्जकुष्टिबधि
रगोलककुंडलादिकंस्पृशयतितदापि दग्धंप्रश्नं ८ शोकसंतापदुःखपीडाबहुअलाभकरोभवति॥ अथ
जीवधातुमूलज्ञाननष्टद्रव्यस्थानबंधमोक्षणजीवितमरणजयपराजयलाभालाभगमनागमनत्रि
कालज्ञानप्रश्नान्प्रकाशयतीदंशास्त्रंनान्यथा॥ ऊर्द्धदृष्ट्याभवेज्जीव अधोदृष्ट्याचमूलकं॥ समदृष्ट्या
भवेद्धातुर्मूलदेवेनभाषितं१ यदिप्रष्टाप्रश्नपृच्छति तदादिनमानंत्रिभिर्विभज्योदयेआलिंगितप्रश्नः मध्य
वेलायांअभिधूमितप्रश्नः॥ अस्तंगतवेलायांदग्धप्रश्नःउदयवेलायांजीवधातुमूलं॥ मध्यवेलायांधातु
मूलजीवंवदेत्।अस्तंगतवेलायांमूलजीवधातुवदेत्॥ तत्रत्रिभागस्यत्रिभागाज्जीवधातुमूलंवदेत्॥ त्रिं
शत्घट्यात्मकदिनमानं ३०। तस्यत्रिभागोदशदंडात्मकः १०। तस्यत्रिभागोदंडत्रयंविंशत्पलात्मकः३।
२०।एवमन्यत्रवेलायां॥ आलिंगितवेलायामालिंगितप्रश्नेआलिंगितफलं॥ आलिंगितवेलायामभिधू

मितप्रश्नेअभिधूमितफलं २ । आलिंगितवेलायांदग्धप्रश्नेदग्धफलं ३ ॥ अथाभिधूमितवेलायांअभिधूमितप्र
श्नेआलिंगितफलं ४ ॥ अभिधूमितवेलायांदग्धप्रश्नेअभिधूमितफलं ५ ॥ अभिधूमितवेलायांआलिंगितप्रश्ने
दग्धफलं ६ । दग्धवेलायांदग्धप्रश्नेआलिंगितफलं ७ ॥ दग्धवेलायामभिधूमितप्रश्नेदग्धफलं ८ । दग्धवेलाया
मालिंगितप्रश्नेअभिधूमितफलं ९ ॥ इदानीपिंडार्थस्वरांकानि
वक्ष्यंते ॥ अथानंतरंव्यंजनांकानिवक्ष्यंते पिंडांकेत्रिभि ३ र्वि
भज्यैकेनजीवं द्वाभ्यांधातुः शुन्येनमूलं असंवादे एकेदे य
हेयंवां उदयवेलायांजीवधातुमूलं मध्यवेलायांधातुमूलं
जीवं । अस्तंगतवेलायांमूलंजीवधातुंक्रमः ॥ जीवेद्वे
जीवाश्चतुर्विधा । द्विपदचतुष्पदाबहूपदअपदादिभेदात्
॥ पिंडस्यचतुर्४भागावशेषात् एकेनद्विपदः द्वाभ्यांचतुष्प

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः
७० ७० ७० ६० ४० ५० ० ० ० ० ६० ७० २० ९० १०० १००
क ख ग घ च छ ज झ ट ठ ड ढ त थ द ध प फ
७ ७ ६ ४ ७ ७ ६ ४ ७ ७ ६ ४ ७ ७ ६ ४ ५ ७ ७
ब भ म य र ल व श ष स ह ळ क्ष ॥
६ ४ ५ ७ ७ ६ ४ ७ ७ ६ ४ ० ० ॥ ॥

के.प्र र:॥त्रिभिरपदः॥चतुर्भिर्बहुपादः॥द्विपदाःपिचतुर्विधाः॥देव-नृ-पक्षि-नारकभेदात्॥चतुर्भि४र्भागः
३ ॥एकेनदेवः॥द्वाभ्यांमनुष्यः त्रिभिःपक्षि॥चतुर्भि४र्नारकः॥देवहृष्टेदेवाश्चतुर्विधाः।कल्पवासीभुव
नवासि॥अंतरंज्योतिर्वासिनांभेदात्॥एकेनकल्पवासिनःइंद्रेशान्यादिकाः यस्त्रिंशल्लोकपालजि
ननारायणादयः॥द्वाभ्यांभुवनवासिनः॥असुरनागविद्युत्सपर्णाग्निवातस्तनिजोदधीद्विपदंकुंभा
दयः॥त्रिभिर्वनचरांतवासिनः॥विद्याधरकिन्नरकिंपुरुषमहोरगगंधर्वराक्षसभूतपिशाचादयः॥
केचिद्वदंतिद्विपदादेवताराजानःतपस्विनोज्ञानिनांभेदात्॥शुन्येज्योतिर्वासिनःसूर्यचंद्रमसौग्र
हनक्षत्रप्रकीर्णतारकाश्च।दिव्येहृष्टेगौरश्यामश्चेति॥तत्रद्विपदेत्रिविधोभेदःपुरुषस्त्रीनपुंसक
भेदात्॥तत्रापिपंचधाभेदात्॥बालकुमारमध्ययुवावृद्धाः॥आलिंगितेनपुरुषाः॥अभिधूमिते
नारी॥तथादग्धकेभवेत्षंढः॥त्रिभिर्भागः॥एकेनपुरुष॥द्वाभ्यांस्त्री॥शून्येननपुंसकः३।इदानीं राम
मनुष्याःपंचविधा॥ब्राह्मणक्षत्रियवैश्यशूद्रांत्यजाः॥अंत्यजमर्दनेच्छाभागेनबोध्यव्याः॥पक्षि ३

णोद्विविधाः॥जलचरास्थलचराश्च द्वाभ्यां भागः एकेन जलचराः॥ चक्रवाकं हंसं बकं सारसं सुरगादी प्रभृत
यः तेपि द्विधाः भक्षा अभक्ष्याच एकेन भक्ष्याः॥ द्वाभ्यामभक्ष्याः॥स्थलचराः। चटकं गृध्रं मयूरं पारावतादि
यः तेपंचधाः॥ श्वेत कृष्ण॥ हरित॥पीत॥ रक्तादयः॥ पंचभिर्भागः क्रमेण बोधव्याः नारकी द्विधाः॥ द्वा
भ्यां भागः॥ एकेन कर्मजाः॥ द्वाभ्यां योनिजाः कर्मजा। कुष्ट भगंदर युक्ताः॥ योनिजा नारकाः॥ इदानीं चतु
ष्पदाश्चतुर्विधाः॥ खुरी॥ नखी॥ दंती॥ शृंगी च॥ चतुर्भिभागः क्रमेण बोधव्याः॥ एकेन खुरी॥ द्वाभ्यां न
खी॥ त्रिभिर्दंती॥ चतुर्भिः शृंगी युक्ता द्विविधाः॥ ग्राम्याः अरण्यवासिनश्च॥ ग्राम्या अजा मेष गज तुरंग वृष
भ गर्दभादयः॥ अरण्यवासिनः॥ महिष गवय प्रभृतयः ग्राम्यदंतिनः ग्रामवासिनो हस्ति शूकरादयः॥ व
नवासि दंतिनोऽरण्यशूकरादयः। शृंगिणो ग्रामवासिनो गोमहिषादयः। शृंगिणोऽरण्यवासिनोऽरण्यम
हिषादयः। इदानिं जीवा द्विविधा। जलचराः स्थलचराश्च जलचरा मत्स्य मकर कुंभीनक्रादयः। तेपि द्वि
धाः॥ भक्ष्या अभक्ष्याश्च॥ अंडजा भ्रमर काक कुलंगादयः॥ स्वेदजाः। यूकालीकादयः॥ इदानीं धातुज्ञानं

के॰म वस्ये॥धातवोद्विविधाः।धाम्य॥अधाम्याश्चं॥एकेनधाम्यांद्वाभ्यामधाम्या॥धाम्या अष्टविधाः॥सुवर्णं
४ रजतताम्रकांस्यपित्तलिरंगसीसलोहाख्या॥ अष्टभिर्भागः॥एकेनसुवर्णं॥ द्वाभ्यांरजत॥त्रिभिस्ताम्रं ॥च
तुर्भिःकांस्यं।पंचभिःपित्तलिः।षड्भिरंगः।सप्तभिःसीसक॥अष्टभिर्लोहं॥ तत्रापिभेदद्वयं।घटितमघटितं
चं॥एकेनघटितं॥द्वाभ्यामघटितं॥घटितस्याष्टभेदाः॥शिरकर्णग्रीवाबाहुहृदयकरकटिपदाभरणानिं॥
अष्टभिर्भागः एकेनशीर्षाभरणं। द्वाभ्यांकरण्ः॥त्रिभिःग्रीवा॥चतुर्भिर्हृदय॥पंचभिर्बाहूकेयूरादयः।ष
ड्भिर्हस्ताभरणं॥सप्तभिः कट्याभरणं॥शून्येनपादाभरणं॥ तद्विधाः॥एकेनदक्षिणाभरणं।द्वाभ्यांवामा
भरणं॥ तदपिद्विविधं।एकेनद्विपदाभरणं॥ द्वाभ्यांचतु ष्पदाभरणं॥अधाम्याधातवोद्विविधाः॥एकेन
माणिक्य·हीर·प्रवाल·मौक्तिकपद्मरागवैडूर्य्यनीलकादयः॥द्वाभ्यांमिष्टिकावालुकाकरमृत्तिकादयः।
तेपिपंचविधाः॥एकेनश्वेताः॥द्वाभ्यांकृष्णाः त्रिभिर्हरिताः॥चतुर्भिःपीताः॥पंचभिरक्ताः॥इदानींमूलनि राम
र्णयः॥मूलंचतुर्विधं॥वृक्षगुल्मलताभेदात्॥एकेनवृक्षः नालिकेरजंबिरादयः॥द्वाभ्यांगुल्माः कुंद·करविर· ४

गुलाब·कर्पासा दयः। त्रिभिर्वल्लीलताकुष्मांड·काश·सिंहराटादयः॥ चतुर्भिर्वल्लीतृणधान्यदूर्वागोधूमा
दयः। तत्रापिपंचभेदाः त्वक्पत्र·पुष्प·फल·निर्यासादयःपंचभागेनबोधव्याः। वृक्षेसप्तभेदाः। एकेनजटा
द्वाभ्यांत्वक् त्रिभिःशाखा। चतुर्भिःपत्रं॥ पंचभिःपुष्पं॥ षड्भिःफलं॥ सप्तभिर्निर्यासः। तेचसप्तविधा। वृत्त·त्रि
कोण·लुष्ट·लोष्ट·पंचकोणाष्टकोणशशिदीर्घभेदात्॥ एकेनवृत्तं॥ द्वाभ्यांत्रिकोणं॥ त्रिभिर्लुष्टं। चतुर्भिर्लो
ष्टं॥ पंचभिर्द्वाष्टकोनं॥ षड्भिःशशि॥ सप्तभिर्दीर्घं॥ पुनर्द्विधा। भक्ष्यमभक्ष्यंच॥ एकेनभक्ष्यं। द्वाभ्यामभक्ष्यं
॥ तदापिद्विविधं॥ सुगंधिदुर्गंधिभेदात्॥ एकेनसुगंधि। द्वाभ्यांदुर्गंधिः॥ भक्ष्याः षड्विधाः। तिक्त·कटुक·
कषायाम्ल·लवण·मधुर·भेदेन॥ तदापिद्विविधं॥ मृदु·कठिनंच॥ एकेनमृदु॥ द्वाभ्यांकठिनं। तत्रापिपंच
धावर्णाः। श्वेत। कृष्ण हरित॥ रक्त। चित्रा॥ फलंचतुर्विधं। दीर्घ·वर्तुल·त्रिकोण·चतुरस्त्र·भेदात्॥ तत्त्रिवि
धाः॥ वस्त्रसूत्रकर्पासभेदात्॥ इदानीमंगस्पर्शनंवस्ये। शिरस्पर्शेनवृक्षः। उदरस्पर्शेनगुल्माः। बाहु
स्पर्शेनलता। पृष्टेनवल्ली॥ पादेनकंदः। दैवज्ञेनेवनिरीक्ष्यितेदूतेपृच्छतिसतिनष्टवस्तुस्वेकथनीयं॥ अधोनि

 रीक्षिते॥धो वक्तव्यं॥ कोणे प्रविश्य पृच्छति कोणे एव वक्तव्यं॥ यस्य दिक् प्रविश्य पृच्छति वा यत्रावलोकये
 त्तत्र वक्तव्यं॥ यत्र दिने पृच्छति तदहो नष्टस्यं। पंचभिर्भागः॥ एकेन गृहं। द्वाभ्यां रसातलं॥ त्रिभिर्देवालये
॥ चतुर्भिः परवेश्मनि। पंचभिश्चौरहृतं। एकेन द्रव्यनामं। द्वितीये ग्रामनाम॥ तृतीये गृहनामं॥ चतुर्थे स्थि
तिनामं॥ प्रथम तृतीयं· चतुर्थं· पंचमे· तृतीयं द्वितीय त्रितिये पंचभिः। पंचमे द्वितीय तृतीयं चाष्टकं पंचमष
ष्टत्रिचतुरकषष्ठासप्तषड्विर्वर्गातं। कुरुते प्रश्नान् अष्टकोणान् अष्टैव भागा बोधव्याः। प्रथमं द्वादशभागाः॥
शेषप्रश्नमादिशेत्॥ मेषे ग्रामे॥ वृषे क्षेत्रं॥ मिथुने चतुष्पथं॥ कर्के रसातलं॥ सिंहे॥ तरिक्षं॥ कन्यायां शून्यागा
रं तुले पथि। वृश्चिके गृहं॥ धनुष ग्रामः॥ मकरे॥ तरिक्षं। कुंभे तडागं॥ मीने नदीतीरं। वा गंगायां॥ इदानीं
विशेषचौरज्ञाने॥ इ ई पंचगुणं प्रोक्तं उ ऊ सप्तगुणं तथा॥ ए ऐ एकादशं चैव ओ औ षट्गुणं तथा॥ सामा
न्यं द्विगुणीकृत्य शकसंख्यासुदाहृतं। स्वरसंख्या हरेद्भागं शेषश्चौरमुदाहृतः। कृष्णपक्षे भवेद्दुःखं शुक्लपक्षे राम
जयो भवेत्॥ इति चौरप्रकरणं॥ इदानीं चिंताप्रकरणं॥ संयुक्तप्रश्ने दृश्यते चिंता या सुतमा चिंता॥ अ ५

संयुक्त प्रश्ने मध्यमचिंता। अभिहिते लाभचिंता॥ अनभिहिते जीवनचिंता॥ अभिघाते लाभचिंता॥ आलिं
गिते संयोगचिंता॥ अभिधूमिते अर्थचिंता॥ दग्धे योगचिंता॥ इदानीं पिंडस्य द्वादशभागः॥ मेषे द्विपदं
॥ वृषे चतुष्पदं॥ मिथुने युग्मं। कर्के व्यापारं॥ सिंहे राजचिंता। कन्यायां विवाहचिंता॥ तुलायां धातुः॥ वृ
श्चिके रोगः॥ धनुषि लाभः॥ मकरे कलहः॥ कुंभे गर्भः॥ मीने स्थानचिंता॥ केचिद्वदंति। मेषे स्वर्णः॥ वृषे
रजतं॥ मिथुने ताम्रं॥ कर्के कांस्यं॥ सिंहे लोहं॥ कन्यायां वस्त्रं॥ तुलायां कर्पासः॥ वृश्चिके धान्यं धनुषि नौ
का॥ मकरे वृहन्मत्स्यजलचरादि। कुंभे सूत्रं मीने नाद्रव्यं॥ इदानीं लाभालाभौ वक्ष्ये॥ संयुक्ते लाभः चं
द्रनाडीवहेन्न लाभः। एकेनापि धूमितेन मंदलाभः अभिघातके सूर्यनाडीवहेन द्वाभ्यां भागः॥ दग्धे नास्ति
लाभः॥ शून्येनापि चंद्रसूर्यनाडिकावहेत॥ अनभिहिते दग्धे नास्ति लाभः॥ अथावधिं वक्ष्ये॥ आलिंगि
ते दिनं प्रोक्तं मासस्यादभिधूमिते। दग्धेन वत्सरं प्रोक्तं मुलदेवेन भाषितं॥ इदानीं जयपराजयं वक्ष्ये॥ आ
लिंगिते जयः॥ अभिधूमिते संधिः॥ दग्धे भंगः॥ त्रिभिर्भंगः। एकेन जयः। द्वाभ्यां संधिः। शून्येन भंगः॥ त्रिभिर्भंगः दक्षि

कें॰म॰ णेपृच्छतिजयः।सन्मुखेसंधिः।पृष्टेमरणं।इतिभणितंमूलदेवेन॥इदानींमरणजीवनंवक्ष्ये॥अक्षरपिंडेद्विगुणिते
६ मात्रापिंडेचतुर्गुणेत्रिभिर्भागः।एकेनजीवनं।द्वाभ्यांपीडा॥शून्येनमरणं॥विषमाक्षरेणमरणं समाक्षरेणपी
डा॥आलिंगितेदिनं॥अभिधूमितेमासः।दग्धेवत्सरः॥इदानींगमनागमनंवक्ष्ये॥त्रिभिर्भागः।एकेनगमनं।द्वाभ्यांवि
लंबेनगमनं।शून्येनास्तिगमनं॥इदानींसत्याःसत्यंवक्ष्ये॥एकेनसत्यं॥द्वाभ्यामसत्यं।शून्येनास्तिदृष्टं।इदानींदृष्टादृष्टं
वक्ष्ये।एकेनदृष्टं।द्वाभ्यामदृष्टं।शून्येनादृष्टं।आलिंगितेनदृष्टं।अभिधूमिते दशदिनाभ्यंतरेदृष्टं।दग्धेनपक्षमेकदृष्टं।इदानीं
सुखदुःखंवक्ष्ये॥एकेनसुखं।द्वाभ्यामध्यमसुखं। इदानींसुभिक्षंदुर्भिक्षंवक्ष्ये॥एकेनसमर्घं॥द्वाभ्यांसम
ता॥शून्येनमहर्घं॥इदानींगर्भप्रकरणं॥त्रिभिर्भागः॥आलिंगितेगर्भः॥एकेनाभिधूमितेगर्भोनास्ति
।द्वाभ्यमपिदग्धेनगर्भपातः॥शून्येनाप्यालिंगितेमासमध्येगर्भः॥शून्येनालिंगितेपुरुषगर्भः॥अभि
धूमितेनस्त्री।दग्धेनपुंसकः॥ओष्ठकंठग्रीवानेत्रललाटकर्णशीर्षैनखैःपृष्टासन्मुखेपृच्छतितदापु राम
त्रजन्मैकेनापि॥नाभिहस्तपादास्तनैःस्पृष्ट्वा यदिपृच्छतितदास्त्रीजन्म॥द्वाभ्यामपि॥एकेनगौरः। ६

द्वाभ्यां श्यामः॥ शून्येनातिकृष्णा॥ अथ विवाहप्रकरणं। आलिंगितेन विवाह एकेन॥ अभिधूमिते कष्टेद्वाभ्यामपि॥ दग्धेनास्ति शून्येनापि॥ संयुक्तेन विवाहः। असंयुक्ते अन्ये गृहांतरत्यास्त्री॥ अभिहिते द्वयोर्मरणं॥ अभिघाते श्वसुरमरणं॥ अभिधूमिते कन्यामरणं॥ अष्टभिर्भागः॥ एकेन विवाहः॥ द्वाभ्यां कष्टेन विवाहः॥ त्रिभिर्नास्ति विवाहः॥ चतुर्भिः कन्यामरणं॥ वा कुष्टं वा वंध्या पंचभिः कन्यापितृमरणं॥ देशांतरगमनं वा स्त्री वृथागमनं। षड्भिः संयोगेन राष्ट्रभंगः॥ सप्तभिर्द्वयोर्मरणं॥ वा श्वसुरमरणं॥ अष्टभिः व्यांगजः मरणं॥ पुत्रमरणं॥ इति विवाहप्रकरणं॥ इदानीमायुर्वक्ष्ये॥ एकेन जीवनं॥ द्वाभ्यां कष्टं॥ शून्येन मरणं॥ ॥ इदानीं कालो वक्ष्ये॥ एकेन वर्तमानः। द्वाभ्यां भविष्यकालः॥ शून्येन भूतकालः॥ इदानीं नष्टजातकं वक्ष्ये ॥ सेव त्मासः पक्षः तिथिवारसंख्या तथैव दिनं॥ तथैव कालसमादिष्टं। मात्राद्येकगुणं प्रोक्ता नाक्षर द्विगुणं स्मृतं॥ एवं कालभरणि यं मूलदेवेन भाषितं॥ वर्षभागः १७८ शेषो वर्षः। अक्षरं पिंड द्वाभ्यां भागः। एकेन शुक्लपक्षः। द्वाभ्यां कृष्णपक्षः। अक्षरपिंड त्रिंशद्भागः। २७ एकेनाश्विनी द्वाभ्यां भरणी स्यादपः योगः २७। एकेन वि

के॰प्र॰ ७

ष्कंभः द्वाभ्यांप्रीत्यादयः। पिंडस्य त्रिंशद्भागः शेषमंशः। इदानीमासंवक्ष्ये। पिंडंद्वादशभागशेषेण एकेनफा
ल्गुणं॥ द्वाभ्यांचैत्रः। त्रिभिः कार्तिकः। चतुर्भिर्मार्गशीर्षः॥ पंचभिः पौषः॥ षड्भिर्माघः। सप्तभिर्वैशाखः॥ अष्ट
भिर्ज्येष्ठः॥ नवभिराषाढः। दशभिः श्रावणः॥ एकादशभिर्भाद्रपदः॥ द्वादशभिर्माघः॥ इदानींलग्नंपिंडस्य
द्वादशभागः॥ एकेनमेषः। द्वाभ्यांवृषः। त्रिभिर्मिथुनः। चतुर्भिः कर्कः॥ पंचभिः सिंहः॥ षड्भिः कन्या। सप्त
भिस्तुला। अष्टभिर्वृश्चिकः। नवभिर्धनः॥ दशभिर्मकरः। एकादशभिः कुंभः। द्वादशभिर्मीनः॥ ॥ इतिके
रलप्रश्नंसमाप्तम्॥ ॥ वाराणसीप्रसादस्य नियोगेनप्रयत्नतः॥ काशीसंस्कृतमुद्रायामंकितोयंशिलाक्ष
रैः॥ १॥ श्रीकाशीजीमेज्ञानवापीकेपूर्वफाटकपरश्रीविश्वनाथजीकेपासश्रीयुतमहाराजशिवलालदु
बेजीकेमकानमेछपीजिनकोलेनाहोयउन्होनेइसछापेखानेकेकार्यसंपादकश्रीयुतबाबूवाराणसीप्र
सादयाकचौरीगलीमेभाईप्रताप्सिंहजीइनकेदुकानपरमिलेगी॥ मितिमार्गशीर्षकृष्ण ११ भृगुवासरे रा॰म॰
समाप्तोयंग्रंथः॥ संवत् १९३१॥ ॥ गणेशपन्तेनलिखितं॥ ॥ ७

४।२१।३८ एकराशौ अंशैः।८।१५। ऊनः दीप्तांशमध्येस्ति तेन मुत्थशिल योगः चंद्रसूर्ययोः एष्यमुत्थशिलोदाहरणं॥
शीघ्रगतिग्रहात्।४।१७।६। अल्पगतिग्रहः सूर्यः ४।२१।३१ दीप्तांशाधिकभागैराधिकः। अतः सूर्यबुधयोरेष्यको
मुत्थशिलयोगः भिन्नराशौ एष्यमुत्थशिलोदाहरणं॥ अंतिमांशस्थितशीघ्रगतेः सूर्यात् ४।२१।२१। द्वितीयराशिस्थि
तमंदगतिग्रहो भौमः ५।२।१० स्वदीप्तिभागमध्येस्ति अत एष्यकं मुत्थशिलं। ईसराफयोगोदाहरणं। मंदगतिग्रहात्
बुधात् ४।१७।६ शीघ्रगतिश्चंद्रः।४।२१।२३। अधिकः अतस्तयोरीसराफः॥ अथ कंबूलयोगोदाहरणं॥ सूर्यः ४

उच्चेव्योमदशाश्च रीचयुजिखंमध्येनुपाताद्दलंमुख्यंपं चसुपंचवर्गजयुतेः पादोत्रविंशोपकाः॥१६॥ नीच
खेटांतरं षड्भाधिकं चेदर्कतस्त्यजेत् तल्लवा नव१ भिर्भक्ता स्ताजिकेतुंगजं वलं १७ इति मुख्य पंचवर्गव
लं॥

।२१।३१ शुक्रः ४।२६।१५ अनयोर्मुत्थशिलमस्ति चंद्रः ४।२१।२३ सोप्यस्ति अतः कंबूलयोगः॥ इतियोगत्रयोदाहरणं
॥ अथैषां शुभाशुभमाह॥ स्वर्क्षोच्च इति॥ ते मुत्थशिलादयस्त्रयो योगाः॥ स्वर्क्षोच्चे स्वराशौ स्वोच्चे ग्रहे सति शुभफलदाः
स्वहृद्कसुखे स्वहद्दद्रेष्काणनवांशमध्याः मध्यमफलदाः स्वनीचारिभे स्वनीचे सशत्रुग्रहे नीचाः अधमफलदाः स्वगे
शुष्टग्रहेष्वपि भिन्नराशिस्थितेष्वपि अन्योन्यदृष्ट्या परस्परदृष्ट्या ते एकराशिस्थग्रहयोरुक्ता मुत्थशिलाद्या योगा
भवंतीत्यर्थः॥१३॥ इतियोगत्रयसाधनं॥ अथ पंचवर्गीबलमाह॥ त्रिंशदिति॥ स्वगृहस्थितेग्रहे त्रिंशद्दलं ३० स्या

	स्व	मि	श
गृ	३०	१५	४
ह	१५	७॥	२
द्रे	१०	५	१।२०
न	५	२।३०	०।४०

प्यंसुहृद्दो मित्रगृहे तिथ्ययः॥१५ पंचदश शत्रुगृहे सार्द्धसप्त ७।३० स्वहद्दके अर्धं १५।० मित्रहद्दायां सार्ध सप्त ७।३० शत्रुहद्दायां पादत्रयं॥ ३।४५ ततः स्वद्रेष्काणे त्र्यंशः १० मित्रद्रेष्काणे ५।० शत्रुद्रेष्काणे २।३०। स्वनवांशे षडंशः॥ ५।० मित्रनवांशे सार्द्धद्वौ २।३० शत्रुनवांशे सपादरूपं १।१५ उच्चे परमोच्चे व्योमदृशः ॥ विंशतिः २०।० परमनीचे खं शून्यं ०।० मध्ये उच्चनीचांतराले अनुपाताद्बलं॥ अनुपातमाह॥ नीचखेटां तरं परमनीचग्रहांतरं कार्यं षट्भात् षड्राशितोऽधिकं तदा चक्रतः॥ १२ द्वादशभ्यः शोध्यः॥ षड्राशिशून्यं यथास्थित मेवेत्यर्थः सिद्धं तस्य लवाः अंशाः कार्याः पश्चान्नवभिर्भक्ताः लब्धं ताजिके ताजिकशास्त्रे तु गजं उच्चजं बलं भवति॥ ए वमनया रीत्या मुख्यं पंचसु पंचवर्गजं युतेः मुख्याः प्रधानाः पंचवर्गाः गृहउच्चहद्दात्रैराशिकमुसल्लहसंज्ञाः तेभ्यो जा तानां बलानां या युतिरैक्यं तस्याः पादश्चतुर्थांशः अत्र पंचवर्गा विंशोपकाः विंशोपकात्मकं बलमित्यर्थः त्र्यंशोनस प्तार्द्ध।२० त्पेवलेसति ग्रहः कनिष्टबलः सत्र्यंशत्रयोदश १३।२० त्पं बले मध्यबलं ततोऽधिके पूर्णमिति सर्वत्र त्र्यं॥ विंशतिविंशोपकानां त्रेधाविभाग इति तत्त्वं॥ उदाहरणम्॥ ५।२४।४२।१२॥ रवेः शत्रोर्बुधस्य ग्रहे कन्यायां तिष्ठति अतः शत्रुगृहे सार्द्धसप्तलवा इत्युक्तत्वात्॥ सार्द्धसप्त ७।३० ग्रहे प्राप्ताः॥ नीचं ६।१० खेटांतरं ०।१६॥ १८।४८। षड् भान्नूनमतो यथास्थितमेव अस्य लवाः॥ १६।१७।४८॥ नवभिर्भक्ताः जातं उच्चं बलं १।४२ कन्यायां भौमस्य मित्र स्य हद्दे शे अस्ति अतो जातं हद्दाबलं ७।३० बुधस्य शत्रोर्द्रेष्काणोऽस्ति॥ अत्र त्रैराशिकबलं २।२० अत्र रविः स्वनवांशे

स्ति अतो नवांशबलं ५।० पंचवर्गी इति ॥ २४।१२ ॥ अस्याः पादोजातः रवेः पंचवर्गी विंशोपकाः ६।३ एवं जातानि सर्वेषां बलानि तद्युतिर्विंशोपका श्चलिख्यंते ॥ इति पंचवर्गीबलाबलाध्यायः १४ ॥ अथ वर्षेशज्ञानार्थं पंचाधिकारिज्ञानं विवक्षुस्तत्रादौ त्रैराशिकेश्वरानाह ॥ सूर्येज्याविति ॥ मेषादेषु चतुर्षु राशिषु वर्तमाना याहायनतनो वर्षप्रवेशलग्नस्य एतावह

सू	च	मं	बु	गु	शु	श	ग्रहाएते	पंचवर्गीचक्रं
३।० २	१।० ३	७।० २	१५ ०	१५ ०	७।० २	२५ ५	गृहबलं	
१५ २	१५ ४	२ १५	१० ८ ५	१० ० ५	२० ५	१ ४	उच्चबलं	
० ० ३	१ ४ ०	७ ० २	१५ ० ०	७ ० २	३ ५ ४	२ ५ ४	हद्दाबलं	
२ ० ३	२ ० २	१० ० ०	२ ० २	२ ० २	२ ० ३	२ ० ३	द्रेष्काणब	
५ ०	२ ० ३	१० ५ ०	१ ५ ५	२ ० ३	१ ५ १	२ ० ३	मुसल्लहब	
२४ २ १०	२५ ४४	१० ० ५	१० १३	४७ ० २०	१८ ५८	४७ ८ ४४	योगः ॥:	
६ ३	६ ४	१५ ५	१२ ४	१ ५२	४ ४४	४० ३७	विश्वा ४	

सूर्येज्यौ सितशीतगू शनिविदौ शुक्रासृजौ चक्रमान्मेषादेषु चतुर्षु हायनतनौ चाहर्निशोः स्वामिनौ ॥ व्यस्तौ तौ हरितश्चतुर्षु च यस्मात्चापाच्चतुष्के श्वरा मंदारेज्यनिशाकराः क्रमगतास्त्रैराशिकाधीश्वराः ॥ १८ ॥ निशोर्दिनरात्र्योः स्वामिनौ स्तः ॥ तद्यथा ॥ वर्षप्रवेशसमये मेषलग्ने दिवारात्रौ सूर्येज्यौ त्रैराशिकेश्वरौ ज्ञेयौ ॥ वृषे शुक्रचन्द्रौ मिथुने शनिबुधौ कर्के शुक्रभौमौ दिवारात्रौ त्रैराशिकेश्वराविति सर्वत्र संबंधः तौ हारीतः सिंहाच्चतुर्षु राशिषु विपरीतौ ज्ञेयौ ॥ तद्यथा ॥ सिंहलग्ने वर्षप्रवेशे दिवारात्र्योः क्रमात् गुरुरवी स्तः कन्यायां चंद्रशुक्रौ तुलायां बुधशनी । वृश्चिके भौमशुक्रौ । अथ चापात् धनुषः चतुर्षु राशिषु लग्नस्थेषु सदा दिने रात्रावपि क्रमात् शनिभौमगुरुचंद्रास्त्रैराशिकाधीश्वरा भवंति ॥ १८ ॥ ॥

अथपंचाधिकारिमध्येत्रैराशिकमुक्त्वा इदानीमधिकारिचतुष्टयं वर्षेशनिर्णयं चाह॥ निशीति॥ निशिरात्रौ वर्षप्रवेशे अब्जर्क्षपतिः चंद्रो यद्राशौ वर्ततेतद्राशिस्वाम्यधिकारी॥ दिवावर्षप्रवेशेसति अर्कभपतिः अर्कः सूर्यः यद्राशौ तद्राशौ तद्राश्यधिपतिरधिकारी॥ जन्माब्दलग्नेथिहेशाः जन्मलग्नवर्षलग्नमुंथास्वामिनः त्रैराशिकपतिश्च। अत्र एषां पंचखसदां पंचाधिकारिणां मध्ये वीर्याधिकः पंचवर्गीवलाधिकः लग्नदृक् लग्नं पश्यतियः सग्रहः अत्र वर्षे अब्देशः वर्षेशोभवति॥ अल्पवलोन्यूनवलोपिदृष्टिसहितः दृष्टियुक् अब्देशइति॥ न्यूनवलेदृष्टिसहितो भवतिनान्यथेत्यर्थः॥ साम्येवलेद्वयोः समानवलेयः अधिकदृक् अधिकदृष्टियुक्तः सएव वर्षेशः। दृक्साम्ये दृष्टिसाम्ये वलसाम्ये चाह्नि दिवावर्षप्रवेशे रविः॥ निशिरात्रौ वर्षप्रवेशे इन्दुश्चंद्रो वर्षेशः॥ असकौ असावेव असकौ असौ रविः चंद्रो वा पंचाधिकारिमध्ये नो चेत्तदा त्रिराशीश्वर एव वर्षेशो ज्ञेयः॥ उदाहरणं॥ जन्मलग्नस्वामी शुक्रः वर्षलग्नस्वामी शुक्रः मुथहेशः शुक्रः त्रैराशिकेशो बुधः। दिवासूर्याक्रांतराशीशो बुधः अत्र बुधस्य वलाधिक्याद्दृष्ट्याधिक्याच्च बुधस्य वर्षेशत्वं॥ इति अब्देशविचारः॥ १६ ॥ ॥

निश्यब्जर्क्षपतिर्दिवार्कभपतिर्जन्माब्दलग्नेथिहेशास्त्रैराशिकपोत्र पंचखसदां वीर्याधिको लग्नदृक्॥
सोब्देशोल्पवलोपिदृष्टिसहितः साम्ये वलेयोधिदृक् दृक्साम्येह्निरविर्निशींदुरसकै नो चेत्त्रिराशीश्वरः॥
१२॥ इतित्रैराशिकेशादीनां मध्येब्देशविचारः॥

अथशुभाशुभमुंथहामाह॰ येंशाइति॥ जन्मतनोः जन्मलग्नस्ययेअंशाभागाः तएवमुथहायाः अंशाभवंति॥सा मुथहास्वेशदृष्टास्वामिदृष्टास्वस्वामियुतावा। तथास्वामीष्टेनस्वामिमित्रेणतथावलान्वितेनवलयुक्तेनशुभेन शुभग्रहेणदृष्टायुतावाइष्टप्रदा॥अन्यथास्वामिशत्रुणातथापापग्रहेणयुतादृष्टावातदादुष्टदा॥अनिष्टफलदा शु भामुंथासद्भावे॥ तनुधनसहजपंचमनवमदशमैकादशस्थानेस्थिताशुभफलदा॥दुष्टेअशुभामुंथा॥असत्तिदुष्टा

येंशाजन्मतनोस्तएवमुथहायाः स्वेशदृष्टायुतास्वामीष्टेनतदान्वितेनचशुभेनेष्टान्यथादुष्टदा॥२१॥स द्भावेशुभकृच्छुभात्वसत्तिदुष्टादुष्टकृद्व्यत्ययान्नोकिंचिद्युनषट्सुखांत्यमृतिगादुष्टान्यगाभावकृत्॥ २२॥ इतिशुभाशुभमुथहाविचारः॥स्वर्क्षोच्चेष्टभवर्गगः शुभसुहृद्दृष्टोजयीयोद्युदक्धी५स्वं३का१० य११गतोव्दभान्मुथाशिलीसौम्यैर्बलीपूज्यदृक्॥ ७ भावेचतुर्थषष्ठसप्तमाष्टमद्वादशभावेदुष्टकृतदुष्टफ

लदापूर्वोक्तादुष्टमुथहाशुभभावेपूर्वोक्ताशुभावामुंथादुष्टभावेइतिवैपरीत्येसतिफलंनोकिंचित्शुभाशुभफलंना स्तिद्युन७षट्६सुखं४त्य१२मृति८गाइति॥ लग्नादेतत्स्थानगामुथहादुष्टाअन्यगाप्रथमद्वितीयपंचमनवम दशमैकादशस्थानगाभावकृतभावप्रमाणेनशुभाशुभफलदात्रीपूर्वोक्ताज्ञेया॥ इतिशुभाशुभमुथहाविचारः॥ १७॥ अथग्रहाणांशुभमध्याधमफलादेशनिर्णयमाह॥ स्वर्क्षोच्चेति॥ योग्रहः स्वर्क्षोच्चेष्टभवर्गगः स्वराशौस्वोच्चे

मित्रद्वादशांशवर्गेस्थितः शुभसुहृद्दृष्टः शुभैर्मित्रैर्वा दृष्टः॥ जयीति॰ ग्रहयोः परस्परं युद्धे यः उदक् उत्तरदिक्स्थः स
जयीतस्य संज्ञा॥ वर्षलग्नात् धीत्र्यंकायगतः पंचमतृतीयनवमैकादशस्थानगतः सौम्यैः शुभग्रहैः मुथशिली मु
थशिलमस्यास्तीतिमुथशिली सौम्यग्रहेत्थशालवानित्यर्थः॥ पूर्णरुक् संपूर्णा रुक्दीप्तिर्यस्य सतथोक्तः प्रसन्नदी
प्तिरित्यर्थः॥ वर्गोत्तमहर्षगः यो राशिस्य नवांशो वर्गोत्तमः॥ हर्षस्थानानि पूर्वोक्तानि· तत्रस्थित एतैर्भेदैर्बली पूर्णवली
ग्रहोज्ञेयः॥ तस्य फलमाह॰ संनिति॰ सन् शुभफलदः॥ अर्धगुणवान् उक्तभेदमध्ये अर्द्धभेदाः प्राप्ताः तदामध्यः म

सद्वर्गोत्तमहर्षगोद्विगुणवान्मध्योधमोष्टांत्यषट् ८।१२।६ नीचेल्पोरिभगोजितोर्कखलयुग्वक्रीदशाद्येष्वस
त्॥ २१॥ इतिहद्देशाब्देशतनुपानांशुभमध्याधमफलादेशनिर्णयः॥ शोध्योर्कोविधुतोन्यथानिशित
नुः क्षेप्यामवेत्पुण्यकंतद्वत्कर्मबुधःकुजादथगुरोः पुण्यंयशः सद्मतत्॥ ७ ध्यफलदः। अष्टांत्येषट् नीचे

॥ वर्षलग्नात् अष्टमद्वादशषडन्यतमस्थः नीचेनीचस्थः अल्पः अणुबिंबः अरिभगः शत्रुराशिस्थः युद्धे पराजितः
अर्कयुक् अस्तंगतः खलयुक् खलैः पापैर्युक्तः वक्री वक्रं प्राप्तः एताद्दशोग्रहो॰ धमः दशाद्येषु दशांतर्दशा
दिषु असन् अशुभफलदः॥ इतिग्रहाणांशुभमध्यमाधमफलनिर्णयः॥ १८॥ अथ सहमान्याह॥ शोध्योर्कइति॰॥
अर्कः सूर्योविधुतः चंद्रात् दिवावर्षप्रवेशेसतिशोध्यः॥ अन्यथानिशि रात्रौवर्षप्रवेशेविपरीतंचंद्रः सूर्यात्शोध्यः

इति सर्वत्र ज्ञेयम्॰॥ ततः तनुः क्षेप्यालग्नं योज्यं पुण्यकं पुण्यसहमं भवेत॥ तद्वत् तथैव कुजात् भौमात् बुधः शोध्यः कर्मसहमं भवति॥ गुरोः पुण्यं शोध्यं यशः सद्म यशसहमं॥ अर्कतः सूर्यात् विधुश्चंद्रः शोध्यः विद्यासहमं इनजात् शनेः अर्कः शोध्यः राज्यसहमं पित्राह्वयं पितृसहमं भवति॥ विधोश्चंद्रात् भृगुः शोध्यः मातृसहमं भवति॥ अथ गुरोः आरः भौमः शोध्यः सेमसहमं भवति॥ १२॥ देवेज्यादिति॥ देवेज्यात् गुरोः कुसुतो भौमः शोध्यः ज्ञकटक सहमं भवेत॥ चंद्रात् बुधः शोध्यः बंधकसहमं भवेत॥ कुजात् भौमात् शनिः शोध्यः द्विट् सद्म शत्रुसहमं

विद्याख्यं विधुरर्कतो र्कइनजाद्राज्यं च पित्राव्ह यं मातुः सद्म भृगुर्विधोरथ भवेत्से माद्ध मारो गुरोः॥ २२॥
देवेज्यात्कुसुतो भवेज्ज्ञकटकं चन्द्राद्बुधो बंधकं स्याद्विट् सद्म शनिः कुजादथ भवेच्छौर्यं कुजः पुण्यतः॥
पुत्राख्यं द्युनिशं विधुः सुर गुरो भ्रात्राख्य मार्किर्गुरो लग्नाछीतगुरुश्च मांद्य सहमं स्वेशात्स्व भं द्रव्यकम् २३

भवेत् पुण्यतः पुण्यसहमात् कुजः भौमः शोध्यः शौर्यं पराक्रमसहमं भवेत् द्युनिशं दिवारात्रौ वा वर्षप्रवेशे सुरगुरोः विधुश्चंद्रः शोध्यः पुत्राख्यं सहमं भवेत् एवमग्रेपि ज्ञेयं॥ दिवारात्रौ वर्षप्रवेशे शोध्य शोधकयोर्विपर्ययो नास्ति पाठक्रमेणैव ज्ञातव्यं॥ गुरोः आर्किः शनिः शोध्यः॥ भ्रात्राख्यं सहमं भवति लग्नात् सितगुरुश्चंद्रः शोध्यः मांद्यसहमं स्यात् स्वभं धनभवनं स्वेशात् धनभवनस्वामिनः सकाशात् शोध्यं द्रव्यकं भवति॥ २०॥ २०॥ ॥ ॥ ॥

के॰ वी॰ मृत्याख्यमिति॰ समस्तैः अष्टमभावयुक्तात् शनेः सितरुचिश्चन्द्रः शोध्यः मृत्युसहमं भवति॥ भृगोः शुक्रात् आर्किः श
ता॰ उ॰ निः शोध्यः उद्वाहं विवाहसहमं भवति कुजतः भौमात् बुधः शोध्यः व्यापारसहमं भवति॥ अथ भृगुतः शुक्रात् अर्कः
१२ सूर्यः शोध्यः पारदार्यं परस्त्रीसहमं भवति॥ अथ सहमानां सामान्यतः शुभाशुभफलमाह॥ अब्देशेनेति॰ सहमं अब्दे
शेन वर्षेशेन युतं युक्तं भवेत्॥ नराशिस्वामियुतं स्वेशदृष्ट्यान्वितं सहमस्वामिना युतं दृष्टं वा सद्भिः शुभग्रहैः वा युतं दृष्टं स
तादृशं सहमं सहमाधिपस्य सहमस्वामिनः किसिमे सहमस्वामिदशायां पुण्यवृद्धिं दद्य सहमं स्वेशदशायां धनवृद्धि

मृत्याख्यं समस्तैः शनेः सितरुचिश्चोद्वाहमार्किर्भृगोर्व्यापारं कुजतो बुधोथ भृगुतोर्कः पारदार्यं भवेत्॥ अब्दे
शेन युतं भवेन सहमं वा स्वेशदृष्ट्यान्वितं सद्भिर्वा सहमाधिपस्य किसिमेत् स्वीयफलाभप्रदम्॥२४॥ इति सह
मानि॰॥ भंत्यक्तोदयरवीकसांकुशलवाः प्राक्स्युस्ततूर्ध्वार्द्धतः पात्यानैकइमे पृथक्त्वयुतिहृद् षट्सु ३६।५।१५
।३१।३०। निघ्नादशाः॥

७ मित्यादि॥ उदाहरणं॥ चंद्रात् १३७।३२।४६। सूर्ये ५।२४।४२।१२। शोधिते शेषं ७।१२।५०।
३०। लग्नं ६।२३।१।१०। युतं जातं पुण्यसहमं २।५।५१।४२ एवं जातानि सर्वाणि लिख्यंते॥ २१॥ अथ दशानयनार्थं कृशां
शादीनाह ॥ भंमिति॥ उदयरवीकसालग्नरव्यादीनां येल्पभागास्ते प्रथमकोष्ठे स्थाप्याः पुनः अवशिष्टानां मध्ये यस्य ज श्रमः
ल्पभागास्ते द्वितीयकोष्ठके स्थाप्याः॥ पुनः अवशिष्टानां मध्ये यस्य अल्पभागास्ते तदग्ने स्थाप्याः॥ एवमग्नेपि ज्ञेयम्॥ १२

एवं दशाक्रमोल्लेख्यः॥ तत्तदनंतरं ऊर्ध्वोर्ध्वतः पात्या इत्यादि॰ तद्यथा॰ प्रथमायथागतोएवंस्थाप्याः॥ ततः प्रथ
मं द्वितीयात् द्वितीयं तृतीयादित्यक्रमेण पात्याः शोध्याः एके आचार्याः एतेंशाः न पात्या इति वदंति॥ तदन्यमतेत्व
त्रांगीकृतं एते पात्यांशाः पृथक् स्थाप्याः॥ स्वयुतिहृद्वर्षनिघ्ना इति॥ स्वपात्यांशाः तेषां युतिर्योगः तेन हृद्भक्ताः वर्ष
घ्नः॥ सौरवर्षदिवसाः॥ ३६५॥ अथ सावनवर्षदिवसाः॥ ३६५।१५।३१।३० ततः लब्धेन गुणकेन निघ्ना गुणिताः पृथ
क् स्वस्वपात्यांशाः दिनाद्याः स्वस्वदशासुः साम्येति॥ द्वयोरंशैर्भागैः साम्ये समत्वे सति बलिनः पंचवर्गीबलाधिकस्य
पूर्वा प्रथमा दशा स्यात्॥ द्वयोः समबले पंचवर्गीबलसाम्ये अल्पभुक्तेः न्यूनगतेः पूर्वा दशा ज्ञेयाः॥ सौरदशायां व
साम्येंशैर्बलिनोर्द्वयोः समबले पूर्वाल्पभुक्तेर्दशा तेंशाः स्वैक्यविहृद्दशादिनहता अंतर्दशास्तत्क्रमात्॥
२५॥ इति दशांतर्दशाक्रमः॥ ७ र्षप्रवेशसमये एवं प्रथमसौरदशाप्रवेशः॥ तदधोवर्षप्रवेशकालीनः सूर्यो
लेख्यः॥ प्रथमदशादिनादि प्रथमदशादिप्रवेशकालीनः स्पष्टः॥ सूर्ये योज्यं॥ तद्यथा॥ सूर्यस्यांशस्थाने दिव
सा योज्याः॥ कलास्थाने घटिका योज्याः विकलास्थाने पलानि योज्यानि॥ विकलाः षष्ट्या भक्ताः लब्धं कलासु योज्यं॥ क
लाः षष्ट्या भक्ताः लब्धमंशेषु योज्यं॰॥ अंशास्त्रिंशद्भक्ताः लब्धं राशिषु योज्यं॥ राशयो द्वादशाधिकास्तदा द्वादशभिस्त
ष्टाः॥ शेषं राशयः॥ तादृशे सूर्ये द्वितीयदशाप्रवेशः॥ एवं द्वितीयदशाप्रवेशकालीनः सूर्ये द्वितीयदशादिनादि योज्यं

ताद्दशासूर्येतृतीयदशाप्रवेशः॥एवमग्रेपि॥एवंयोजनेवर्षप्रवेशकालीनसूर्यं तुल्यः अंतिमसूर्योभवति॥तस्
सौरदशाक्रमः॥ शुद्धः अन्यथा अशुद्धइति॥अथसावनदशायांवर्षप्रवेशसमयेसावनप्रथमदशाप्रवेशः॥ततो
वर्षप्रवेशवाराद्दौप्रथमसावनदशादिनानियोज्यानि·तस्मिन्मासेतावतिवारादौद्वितीयदशाप्रवेशः॥एवंद्वितीयद
शाप्रवेशवारादौद्वितीदशादिनानियोज्यानि॥तस्मिन्मासेतावतिवारादौतृतीयदशाप्रवेशः॥एवमग्नेपि॥एवं
योजनेअग्निमवर्षप्रवेशवारादिकमायाति·तदादशाप्रवेशः शुद्धः अन्यथा अशुद्धः॥अथांतरदशासाधनमा
ह॥तैंशाइति॥ लेपात्यांशाः स्वैक्यविहृद्दशादिनहताः स्वपात्यांशास्तेषामैक्येनयोगेनहृतानिभक्तानिदशादिना
नितेभ्योयल्लब्धं तेनहतागुणिताः पृथक्पात्यांशाः अंतर्दशादिनाद्यास्युः एतदुक्तंभवति॥ यस्यदशामानपात्यां
शयोगेन भक्तं यल्लब्धं तेनपृथक्पात्यांशागुणितास्तदाग्निमक्रमेणाज्ञेयं॥ उदाहरणम्॥ शुक्रः सर्वापेक्षयान्यूनां
शः अतो यंत्रादिस्थिताग्रयं शुक्रः स्थापितः २।४३।३९ ततोभौमः ४।४५।४६ ततोगुरुः ४।५७।० ततश्चन्द्रः ७।३२
।४५॥ततोबुधः ७।४८।११ ततोलग्नं २३।१।२ ततोर्कः २४।४२।१२ ततः शनिः २८।१०।११ अथप्रथमंयथास्थितः
शुक्रःपात्यांशाः २।४३।३९ ततः एतेपात्यांशाभौममध्येशोधिताजाताभौमपात्यांशाः २।२।७ एवंपूर्वांशाअग्रिम
मध्येशोधिताजाताः॥ सर्वेषांपात्यांशाः गुरुः ०।११।१४ चन्द्रः २।३५।४५ बुधः ०।१५।२६। लग्नं १५।१२।५१ सूर्यः
१।४१।२ शनिः ३।३६।५९। एतेषांयोगः २८।१०।११ अनेनवर्षमितिः ३६० भक्ताजातोगुणकः १२।४२।४३ अनेन

शुक्रस्य पात्यांशाः २।४३।३० गुणिता जातानि शुक्रस्य दशादिनानि ३४।५०।१८ अथ पात्यांशयोगेन २९।११।११ वर्षमितिः ३६५।१५।३१।३० भक्ता जातो गुणकः १२।५३।५१ अनेन शुक्रस्य पात्यांशाः २।४३।३० गुणिता जातानि शुक्रस्य दशादिनानि ३५।१०।५० सर्वे जाताः सर्वेषां हीनांशाः पात्यांशाः सौरसावनदशाश्चालिख्यन्ते॥ अथान्तर्दशोदाहरणम्॥ शुक्रस्य दशा ३४।५०।१८ पात्यांशयोगेन भक्ता २९।११।११ जातो गुणकः १।१३।२७ अनेन शुक्रस्य पात्यांशा गुणिता जाताः॥ शुक्रस्य दशामध्ये शुक्रस्यान्तर्दशा॥ ३।२०।२०॥ अथवा शुक्रस्य सावनदशा ३५।१०।५० पात्यांशयोगेन २९।११।११ भक्ता जातो गुणकः १।१४।३१ अनेन गुणिताः शुक्रस्य पात्यांशाः जाता शुक्रदशामध्ये शुक्रस्यान्तर्दशा ३।२३।१४ सर्वे जाताः शुक्रदशामध्ये सर्वेषां सौरसावनानामन्तर्दशा लिख्यन्ते॥ इति दशान्तर्दशाक्रमः॥ २२॥ ॥

[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
२	०	७	११	१०	१०	०	९	९	१	८	८	८	११	०	११	१०	३	०	९	राशी
५	१९	२२	१०	२६	२६	२७	२३	२३	३२	२९	२४	२०	२९	८	३	१४	२७	१९	१	अंशा
५१	५८	६	१०	३८	३८	४०	१५	५	४५	२७	७	२५	३८	२९	४३	४९	२५	५८	२	कला
४१	४४	२०	३६	८	८	१५	२३	२३	३२	४४	५	२४	२५	३३	५३	२८	३७	४४	३६	विकला

शु	मं	बु	चं	बु	ल	गु	श	यो	ग्रहः	—	शु	मं	गु	चं	बु	ल	सू	श	यो	०
३ ४३ ३०	५ ४५ ४६	५ ५७ ००	७ ३२ ४५	७ ५८ ११	२३ १ १	२४ ४२ १२	२९ १२ ११	० ० ०	[illegible] लवा	[illegible]	३ ४३ ३०	५ ४५ ४६	५ ५७ ०	७ ३२ ४५	७ ५८ ११	२३ १ ०	२४ ४२ १२	२९ १२ ११	० ० ०	[illegible]
३ ४३ ३०	३ २ ७	० ११ १४	२ ३५ ४५	० १५ २६	११ १२ ५८	१ ४१ ३	३ ३६ ५०	२९ ११ ११	पात्यांशाः	[illegible]	२ ४३ ३०	२ २ ७	० ११ १४	२ ३१ ४५	० १५ २६	१५ १२ ५८	१ ४१ ३	३ ३६ ५०	२९ ११ ११	
३४ ५० १८	२५ ५२ २०	२ २२ ५८	३२ ५० ५३	३ १६ ११	११३ २५ ३५	२१ २४ ३२	५५ ५८ १७	३६० ० ०	दशादिनानि	[illegible]	३५ १० ५०	१६ १५ ६	२ २४ ५२	२३ २८ ४८	३ ११ ३	११५ १५ ६	२१ ४३ १९	४६ ३८ ३५	३६५ १५ ३१	

अथरव्यादिदशामध्येकेषांअंतर्दशाः शुभाइत्याह॥जीवारेन्दवइति॥ इनात्सूर्यमारभ्यांतर्दशेशाःशुभाः॥तद्य
था॥जीवारेन्दवः गुरुभौमचंद्राः रविदशायामंतर्दशेशाः शुभाः॥ एंदवत्रयं॥ इंदारपत्यमंदवोबुधः तस्मात्त्रयंबु
धगुरुशुक्राःचंद्रदशायामंतर्दशेशाः शुभाः॥ इनेंदु सूर्यचंद्रौ भौमदशायामंतर्दशेशौशुभौ॥ भृग्विनेज्याः शुक्रसू
र्यगुरवः अंतर्दशेशाः बुधदशायांशुभाः॥सितेंद्वर्काः शुक्रचन्द्रसूर्याः गुरुदशायामंतर्दशेशाः शुभाः ज्ञेज्ययमाबुधगु
रुशनयः॥ शुक्रदशायामंतर्दशेशाः शुभाः॥ बुधत्रयंबुधगुरुशुक्राः शनिदशायामन्तर्दशेशाः शुभाः इतिसर्वत्रसंबं

जीवारेन्दवऐंदवत्रयमिनेंदू भृग्विनेज्याः सितेंद्वर्काज्ञेज्ययमाबुधत्रयमिनादंतर्दशेशाःशुभाः॥कृ
त्वैकैकभयुक्तजन्मरविणातुल्यैरवौखेचरास्तन्वाद्यान्प्रतिमासमुद्गमलवेड्भावांशपौचिंतयेत्॥२६॥

धः॥ अनुक्ता अशुभाइत्यर्थः॥ अथमासप्रवेशज्ञानमाह॥ कृत्वेति॥ एकैकराशियुक्तजन्मकालीनसूर्येणतुल्येर
वौसूर्येद्वितीयादिमासप्रवेशःस्यादिति॥ प्रतिमासंखेचरान्ग्रहान्तन्वाद्यान्लग्नादिप्रभृतीन्द्वादशभावांश्च।
कृत्वाउद्गमलवेट्भावांशपौ॥ उद्गमोलग्नंतत्रयोलवोनवांशस्तस्यइट्स्वामीभावांशपः एभावास्तेषांयेअंशास्तत्स्वा
मीएतौउभौचिंतयेत्॥एतदुक्तंभवति॥ प्रथममासप्रवेशसमयेएवंजातः॥ तत्रजन्मार्कतुल्यएवार्कोस्तिजन्मसू
र्यएकराशौजातेतत्तुल्यसूर्योयस्मिन्दिनेयस्मिन्समयेतत्रद्वितीयमासप्रवेशोभवति॥ एवमग्रेपिबोध्यं॥ अथ

पंचांगान्मासप्रवेशघटिकाद्यानयनम्॥ एकैकराशियोगेन जातो मासप्रवेशार्कः॥ अस्यासन्नपंचांगस्थितप्रद्य
वध्यर्कस्तदवधिस्थार्कमासप्रवेशार्कयोरंतरं कार्यं तस्य कलाः कार्याः अवधिस्थार्कगत्या भाज्याः फलं दिनाद्यंत्रि

सौरदशायांशुभाः										सौरांतर्दशाचक्रम०									सौरांतर्दशासूर्याः									सावनान्तर्दशाचक्रम्०							
शु	मं	गु	चं	बु	शु	सू	यो	यो	शु	मं	गु	चं	बु	ल	सू	श	यो	४	५०	६	६	६	६	६	६	६	शु	मं	गु	चं	बु	ल	सू	श	यो
५	६	७	७	१	१	३	४	५	३	२	०	३	०	१८	२	४	३४	२५	२८	०	०	३	४	२२	२५	२१	३	२	०	३	०	१८	२	४	३५
२४	२१	२५	२७	०	३	१७	८	२४	२०	२१	१३	१०	१८	३७	२३	२५	४०	४२	२	३३	४३	५४	१३	५०	१४	४०	२३	२१	१३	१३	११	५४	५	२१	२७
४२	२२	१४	३७	२१	३३	१८	४३	४२	२०	२१	४५	४०	४३	३२	४४	३१	१८	१२	३२	१	४६	२६	१६	५८	४२	२१	१४	३१	५७	२८	१०	४	३१	३२	५०
१२	१०	५१	३७	३३	४५	२२	५५	१२																											

स्थं वारघटिकापलात्मकं ग्राह्यं तत्फलं अवधिस्थवारादौ हीनं कार्यं न्यूने युक्तं कार्यं अवधिस्थवारादावित्यत्र संस्का
रहितो वारघटिकापलात्मकोऽब्दपो ग्राह्यः स यथा॥ यस्मात् ग्रंथात् पंचांग स्थितः सूर्यः साधितः तस्मात् ग्रंथा
त् अब्दपः साध्यः अवधिस्थघटिका न ग्राह्याः कुतः यत्ग्रामस्थपंचांगगतात् ग्रामस्य देशांतरः चरसंस्कारस्यकृ
तत्वात् ताः मासप्रवेशकाले स्थूलघटिका भवंति अतः सूक्ष्मघटिकानयनार्थं उपायः॥ अब्दपे उदयांतरभुजफल
चरदेशांतरसंस्काराः कार्याः॥ सोऽब्दपः सूक्ष्मो भवति। तत्रादौ उदयांतरमाह॥ यस्मिन्दिने यस्मिन्समये स्थूलमानेन

के·वो· मासप्रवेशोजातः तस्मिन्दिनेतावतिसमयेमध्यमोरविः कार्यः सअयनांशयुक्तः कार्यः॥ तस्यभागाः कार्याः ष
ता·उ· ड्भिर्भाज्याः फलंघटीपलात्मकम्० ग्राह्यंतदनंतरंमास प्रवेशकालीनसायनमध्यमसूर्ये यावंतोंशास्त
१५ त्संख्यानांमेषादारभ्यपलात्मकानामुदयानांयोगः कार्यः तदनंतरंसूर्यस्यभुक्तभागैः सूर्यस्यभोग्यराश्युदयोगु
ण्यः त्रिंशद्भक्तः फलंराश्युदययोगेयुक्तंकार्यंषष्ट्याभक्तंघटिकाद्यंस्यात् तस्मिन् पूर्वघटिकाः शोध्याः शेषंधन
संज्ञकंउदयांतरंभवति॥ यदाएतासुपूर्वघटिकाः शोध्याः तदाविपरीताः शोध्याः शेषं
घटिकात्मकंऋणसंज्ञकंउदयांतरंभवति।इदमुदयांतरंधनंचेत्तदाब्दपघटिकासुऋणंकार्यम्ऋणंचेत्तदाध
नंकार्यं॥ अथभुजफलमाह॥ मासप्रवेशकालीनमध्यमसूर्यात् मंदफलंसाध्यं॥ तस्यकलाः कार्याः षष्ट्याधिक
शतत्रयेण ३६० भाज्याः फलंघटिकाद्यंभुजफलसंज्ञकंभवति॥ मंदफलंधनंचेद्भुजफलंधनं॥ ऋणंचेदृणं॥ इदं
भुजफलंधनंचेत् उदयांतरसंस्कृताब्दपघटिकासुऋणंकार्यंऋणंचेद्धनंकार्यम्॥ अथचरसंस्कारमाह॥ मासप्रवे
शकालीनमध्यमसूर्यात् यत्मंदफलमागतंतन्मध्यमसूर्ये यथागतंधनर्णंदेयं॥ तस्मात्पलात्मकंचरमानीय
षष्ट्याभुक्तंघटिकाद्यंकार्यंतत्तुल्यघटिकात्मकंचरंउदयांतरभुजफलसंस्कृतघटिकासुधनंचेदृणंकार्यंऋणंचेद्ध
नंकार्यं॥ अथदेशांतरसंस्कारमाह०॥ यावंतिदेशांतरयोजनानिभवंति॥ तानिचतुर्थांशोनितानिकार्याणि॥ ततो राम:
पलात्मकानिभवंतिततः पलात्मकेदेशांतरंधनंचेत्॥ उदयांतरभुजफलचरसंस्कृतघटिकासुऋणंकार्यंऋणं १५

चेत् धनं कार्यं तत्फलचतुष्टयसंस्कारे कृते ता अब्दपघटिकाः स्पष्टा भवंति॥ परंतु एतत्संस्कारचतुष्टयमध्ये ज
न्मकालीनसूर्यो यावद्भिः संस्कारैः संस्कृतो भवति॥ तावद्भिः संस्कारैरब्दपः संस्कार्यः॥ अवधिस्यार्कमासप्रवेशा
र्कयोरंतरात्पूर्ववद्ध्रासरादिकमागतं तत्स्पष्टे अब्दपे उक्तवत् हीनयुक्तं कार्यं॥ ततः मासप्रवेशे सूक्ष्मघटिका भ
वंति तस्मिन्काले स्पष्टग्रहान् तन्वादिभावांश्च पंचवर्गीं च कार्याः॥ ततो मासेश्वरनिर्णयः॥ सयथा॥ मासलग्नेश
मुंथेशत्रिराशीशदिनरात्रीशवर्षलग्नेश्वराणां मध्ये यः पंचवर्गीबलाधिको मासलग्नं पश्यति स मासेश्वरो ज्ञेयः॥
बलादिसाम्ये तु वर्षेशवद्विचारणीयम्॥ उदाहरणम्॥ रविः ५। २४। ४२। १२ एकराशियुक्तो जातो मासः प्रवेशा
र्कः ६। २४। ४२। १२ कार्तिककृष्णद्वितीयां २ बुधे अवधिस्थोर्कः ६। २३। ४। १८ गतिः ६०। ३० अनयोरंतरं ०। १। ३७। ५४
अस्य कलाः ९७। ५४। गतिकलाभिः ६०। ३० भक्ताः सवर्णितौ भाज्यभाजकौ भाज्यः॥ ५८। ७४ भाजकः ३६ ३० भाजके
न हृते भाज्ये फलं॥ दिनघटिकापलात्मकं। १। ३७। ५ इदं अवधिस्थाब्दपे वारघटिकापलात्मके ४। ३५। ४४ युतं ६।
१२। ४९ कृतः। एकराशियुक्तरवितः अवधिस्थसूर्यस्य न्यूनत्वात्॥ एवं जातः कार्तिककृष्णपंचम्यां भृगौ मध्यमो
र्कः ६। २६। १३। ५८ आभिर्घटिकाभिः॥ १२। ४९॥ चालितो मासप्रवेशकालीनमध्यमोर्कः॥ ६। २६। २६। ३५ अयनांशाः
१८। ८ युतः ७। १४। ३४। ३५। अस्य भागाः २२४। ३४। ३५ षड्भक्ताः। लब्धं घटिकापलात्मकं ३७। २५ सायनसूर्यस्य भु
क्तराशयः सप्त ७ तत्तुल्यमेषादारभ्य पलात्मको दयानां योगः २१३८ सूर्यस्य भुक्तभागैः १४। ३४ भोग्यस्य तु

के.वी. द्यो३४७॥ गुणितः५० ५४ त्रिंशद्भक्तः लब्धं१६८ उदययोगेन २१३८ युक्तं २३०६ षष्टिभक्तं लब्धं घटिकाः ३८।२६
ता.उ. एतन्मध्ये पूर्वघटिकाः ३७।२५ शोधिताः शेषं धनसंज्ञकं उदयांतरं घटिकाद्यंतियौ विपरीतयुक्तत्वात् जातंऋ
१६ णं १।१ इदमब्दपे४।३५।४४ ऊनं जातः उदयांतरसंस्कृतोब्दपः४।३४।४३॥ अथभुजफलमाह॥ मासप्रवेशकाली
नमध्यमसूर्यात्॥६।२६।३५ मंदफलंऋणं१।४२।४३ अस्यकलाः१०२।४२ भाजकेन ३६० भक्ताः लब्धं घटिकाद्यंऋ
णं०।१७ विपरीतयुक्तमित्युक्तत्वात्।जातंधनं०।१७ इदं उदयांतरसंस्कृतेब्दपे४।३४।४३ युतंजातं।उदयांतरभुज ८
फलसंस्कृतोब्दपः४।३५।०॥ अथचरसंस्कारमाह॥ मंदफलसंस्कृतोब्दपः६।२४।३१।१६ एभ्यः चरं धनं पलात्मक
म् ६० षष्टिभक्तं १।२० विपरीतयुक्तत्वात् जातंऋणं१।२० इदं उदयांतरभुजफलसंस्कृताब्दपे४।३५।० रहितंजा
तं उदयांतरभुजफलचरसंस्कृतः४।३३।४०॥ अथदेशांतरसंस्कारमाह॥ देशांतरयोजनानिऋणानि१६ चतुर्थां
शोनितानिजातानिपलानि१२ विपरीतयुक्तत्वात् जातानिधनानि१२ एतानि उदयांतरभुजफलचरसंस्कृताब्दपे
४।३३।४०॥ युतानिजातः उदयांतरभुजफलचरदेशांतरसंस्कृतोब्दपः स्पष्टः४।३३।५२ अवधिस्यार्कमासप्रवेशा
र्कयोरंतरात्पूर्वसाधितवारादिकमिदं१।१७।५ एकराशियुक्तरवितः अवधिस्यसूर्यस्यन्यूनत्वात्स्पष्टेब्दपे४।३३।
५२ युतो जातो मासप्रवेशसूक्ष्मकालः६।१०।५ एवंजातं कार्तिककृष्णपंचम्यां भृगौ द्वितीयमासप्रवेशसूक्ष्मघटिकाः रामः
१०।५७ एवमग्रेपिबोध्यं॥ एकग्रंथात् उभयोः साधनं चेत् क्रियते तदा सूक्ष्मघटिकाः घटिका भवंति॥ अतएववि १६

चार्यग्रंथभेदे सति संस्कारभेदे सति पंचांगोपरि मासप्रवेशानयनं क्रियते तदशुद्धम्॥ यस्मान्ग्रंथात् जन्मकालीन सूर्यो यावद्भिः संस्कारैः संस्कृतो भवति॥ तावद्भिः संस्कारैः तस्मात् ग्रंथान्मासप्रवेशादिवसे सूर्यः साध्यः अनयोः सकाशात् याः घटिकाः स्युः सूक्ष्मघटिका भवंति ॥ अथ दिनप्रवेश उच्यते॥ वर्षप्रवेशसमये एवं प्रथममासस्य प्रथमदिनस्य च प्रवेशः॥ वर्षप्रवेशसूर्ये एकैकांशयोगेन तत्तुल्यसूर्ये द्वितीयदिनप्रवेशो ज्ञेयः॥ २६॥ तत्प्रथमप्रवेशकालज्ञानमाह॥ लग्नेति॥ लग्नेशांशपती लग्ने शतन्नवांशस्वामिनो यो तयोर्मिथः परस्परसख्यं स्नेहदृक् भवति॥ अथ

लग्नेशांशपती मिथस्तनुलवेट् स्वाद्यंशपो यौ तयोः सख्यं स्नेहदृगींदुदृग्युतिरितोच्चस्थौ च दृष्टौ तथा ॥ देहस्वादिषु सौख्यदौ च विपरीतौ भावहानिप्रदौ वर्षे व्यर्द्धगुणौ प्रकल्प्य किल तौ मासेत्र विद्यात्फलं ॥ २७॥

वा तनुलवेट् स्वाद्यंशपौ। तनुर्लग्नं तस्य लवो नवांशस्तस्य ईट् स्वामी स्वं धनभावः स आदिर्येषां ते सहजादयस्तेषां मंशपो नवांशस्वामीन योः सख्यं मैत्र्यं॥ अथ इन्दुदृग्युतिः चंद्रदृष्टियोगः॥ अथवा तौ पती उच्चस्थौ अथवा दृष्टौ शुभैः शुभग्रहदृष्टौ दृष्टौ तथा इति पाठे दृशौ उदितौ। देहस्वादिषु। देहः शरीरं स्वं धनं आदिशब्देन सहजादि परिग्रहः शरीरधनादिषु सौख्यदौ सुखकारकौ विपरीतौ परस्परवैरिणौ नीचस्थौ पापैर्दृष्टौ अस्तंगतौ तदा भावस्य हानिप्रदौ भावनाशकरौ भवतः॥ अर्द्धेति॥ शुभदृष्टौ पापदृष्टौ शुभाशुभस्थानगौ च तदा अर्धगुणौ अर्धफलदौ भ

वतः॥ मासेशौलग्नेशांशपती॰ अथवातनु लवेट् स्वाद्यंशपौप्रकल्प्यविचार्य्य अत्रमासेफलंमासफलंशुभा
शुभंविंद्यात् जानीयात् २४॥ अथसामान्यतोवर्षशुभाशुभनिर्णयमाह॥ यद्वर्षेइति॥ यद्वर्षे यस्मिन्वर्षे अब्द
 पोवर्षस्वामी अतिबलः॥ पंचवर्गीबलमध्येपूर्णबलः॥ तथाब्दतनुपः वर्षलग्नस्वामीपूर्णबलः खेटाश्च। खेटाःग्र
हाःअतिबलिनः।इंथिहामुथाशस्ता॥षष्टाष्टांत्यसप्तमस्थानातिरिक्तातदातद्वर्षंशुभंशुभफलदम्॥अन्यथाव
र्षग्रहाःनिर्बलाःमुंथादुष्टस्थानगातदातद्वर्षंनशुभद् अशुभमित्यर्थः॥मिश्रेणशुभाशुभमिश्रितेन अब्दपेशवर्षे

यद्वर्षेतिबलोब्दपोब्दतनुपः खेटाश्चसुस्थेंथिहातद्वर्षंशुभमन्यथात्वशुभदंमिश्रेण मिश्रंवदेत्॥ एत
द्भावफलादिविस्तृतफलंस्यात्ताजिकोक्तंचयत् खेटानांस्वदशासुतद्बलवशादेवंफलंवार्षिकम्॥२८
इतिसामान्यवर्षफलोपसंहारः॥२८॥

ॐ लग्नेशमुंथाःग्रहाश्चयेषांमध्येकश्चित्पूर्णबलःकश्चिद्धीनबलः
तदामिश्रंशुभाशुभमिश्रंमध्यमंफलंवदेत्॥ एतद्वर्षेशफलम्॥ भावफलादिभावमुंथासहमफलादिविस्तृतफ
लंविशेषफलंतत् ताजिकोक्तंताजिकशास्त्रोक्तंज्ञेयम्॥ खेटानांग्रहाणांशुभाशुभफलंतद्बलवर्षशतात् पूर्णबले
पूर्णंमध्यबलेमध्यंहीनबलेहीनंस्वस्वदशासुज्ञेयम्॥ सहममुंथाफलंतत्स्वामिदशासुभवति। एवममुनाप्रकारे
णवार्षिकंवर्षसंबंधिफलंनिरूपितमितिशेषः॥२५॥ अथालंकारश्लोकमाह॥ ॥ ॥ ॥ ॥ ॥ ॥

इतीति॥विप्रवरिष्ठःकेशवःविप्रेषुब्राह्मणेषुवरिष्ठःकेशवःकेशवदैवज्ञःवर्षफलस्यपद्धतिंमार्गंइतिइत्थंपूर्वो
क्तप्रकारेणअ करोत्कृतवान्॥कस्मात्॥अमृतेशांघ्रियुगप्रसादतः॥अमृतंमोक्षःतस्येशःतत्साधनज्ञानज
नकत्वयास्वामीमहादेवः॥ तस्यांघ्रियुगंचरणद्वयंतत्प्रसादतः॥कीदृशींशिशुशिष्यजनप्रबोधिनींशिशवोबाला
श्चतेशिष्यजना श्चशिशुशिष्यजनाःतेषांप्रबोधोज्ञानंतथा॥२६॥अथजन्मकालज्ञानेप्रश्नकालादेववर्षफल

इतिवर्षफलस्यपद्धतिंह्यमृतेशांघ्रियुगप्रसादतः॥ बहुशिष्यजनप्रबोधिनीमकरोद्विप्रवरिष्ठकेश
वः॥२९॥ इतिश्रीकेशवीताजकोक्तंसमाप्तः॥ ॥

७ कार्यं॥तन्मुंथानयनं॥त्यक्त्वाभंप्रश्नलग्नस्य
कलिकाःस्वासमूहूर्ताः।लब्धाराश्यादिकामुंथास्फुटावर्ष मुखेभवेत्॥२७॥प्रश्नांगपोवर्षविलग्नना
थो जन्माधिपःसूर्यपतिःप्रकल्प्यःप्रश्नेयलग्नान्मुथहाधिपःस्यात्त्रैराशिपःपूर्ववदत्रचिन्त्यः॥२८॥अस्या
र्थः॥प्रश्नेप्रश्नकाले॥इतिश्रीमत्केशवदैवज्ञविरचितावर्षफलपद्धतिःसमाप्ता॥ ॥ वाराणसीप्रसादस्य
नियोगेनप्रयत्नतः॥ काशीसंस्कृतमुद्रायामंकितोयंशिलाक्षरैः॥१॥ श्रीकाशीजीमेमहल्लेहौदकटोराश्रीयु
तबाबूवाराणसीप्रसादजीकेमकानमेकाशीसंस्कृतमुद्रायंत्रमेछपीजिनकोलेनाहोयउनकोउक्तस्थानमेश्रीबा
बूवाराणसीप्रसादजीकेपासयाकचौरीगलीमेभाईप्रतापसिंहजीकेदुकानपरमिलेगी संवत् १९४२ ॥ ॥

इति ताजककेशवीसोदाहरणसमाप्ता

इतिकेरलप्रश्नाःसमाप्ताः